Entered
29-6-16
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh
5114

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1276.

PROVINCIAL MUSEUM REFERENCE LIBRARY

अनुमान-दीधिति-प्रसारिणी

ANUMANA DĪDHITI PRASĀRINI

BY

KRISHNA DAS SARVABHAUMA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

PANDIT PRASANNA KUMAR TARKANIDHI

Professor, Sanskrit College.

FASCICULAS I.

Calcutta:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No. 5, Nandakumar Choudhury's 2nd Lane.

AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.

1911.

LIST OF BOOKS FOR SALE

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,
AND OBTAINABLE FROM
THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH,
11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO
HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

*Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each	Rs. 1	4
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
*Agni Purāṇa, Fasc. 6-14 @ /10/ each	5	10
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III,		
Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
Aitereya Lochana.	2	0
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each	2	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1 @ 1/-	1	0
Aṣtasāhasrikā Prajñāpāramitā. Fasc. 1-6 @ /10/ each	3	12
*Atharvana Upanishad, Fasc 4-5 @ /10/ each	1	4
Atmatattaviveka, Fasc. I. @ /10/ each	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-7; Vol. II. Fasc.		
1-7 @ 1/ each	15	0
Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fase 1-3 @ /10/ each ...	3	12
*Bhāmatī, Fasc. 4-8 @ /10/ each	3	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10 each ...	4	6
Baudhyostatrasangraha	2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	3	2
Cri Cantinatha Charita, Fasc. 1-3	1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. I-5, Vol. III,		
Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1--14 @ /10/ each	8	12
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I,		
Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each ...	36	14
Ditto Vol. 4, Fasc. 7-8. @ 1/4/ each	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/	1	4
Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each	3	12
Ditto Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4,		
Vol. III, Fasc. 1-4; Vol 4. Fasc. 1 @ /10/ each	10	0
Çri Bhāshyam, Fasc 1-3 @ /10/ each	1	14
Dāna Kriyā kaumudī, Fasc. 1--2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol. 1 @ /10/ each	3	2
Ditto Vol. II. Fasc. -2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
Karmapradiph, Fasc. I	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Kātantra, Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	17	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each	4	[illegible]
Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each	3	[illegible]
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	1[illegible]
Mahā-bhāṣya-pradipōdyōta, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III,		
Fasc. 1-10 @ /10/ each	19	[illegible]
Ditto Vol. IV, fasc. 1 @ 1/4	1	[illegible]
Manuṭikā Sangraha, Fasc. 1-3 @ /10/ each	1	1[illegible]
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

State Museum Library Lucknow 5114

तत्त्वचिन्तामणिः।

प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनुमानं निरूप्यते।

अनुमानदीधितिः।

ओं नमः सर्व्वभूतानि विष्टभ्य परितिष्ठते।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥ १ ॥

पूर्व्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्यानामवधानाय च सङ्गतिं प्रदर्शयन्ननुमाननिरूपणं प्रतिजानीते प्रत्यक्षमित्यादि।

दीधितिप्रसारिणी।

श्रीगणेशायनम, परदेवतायै नमः। विष्टभ्येति। न च विष्टम्भः संयोगविशेषः। स च आकाशेन समं नास्तीति कथमेतदिति वाच्यम्। तत्पदेन (१) सहकारित्वस्यैव विवक्षणात्।

---

(१) विष्टम्भपदेनेत्यर्थः, तथाच जगद्रक्षणाय, तद्रक्षणार्थं सर्व्वभूतानि सहकार्यावस्थितायेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्रोपजीव्योपजीवकभावः फलतः स्वरूपतश्च । प्रत्यक्षफलस्यानुमित्यनुव्यवसायादेरनुमित्युपजीवकत्वेऽपि न सर्वाः प्रत्यक्षप्रमितयस्तथा ।

स्वयमेव विश्वान्तरनिरासात् वा । अखण्डेति । ईश्वरे स्वयमेव नित्यसुखव्यवस्थापनात् एतदुक्तम् । ननु सङ्गतं हि निरूप्यम् तदुपनिबन्धश्च मूले व्यर्थः इत्यत आह पूर्व्वेति ।

तथाच सङ्गति (१) र्व्याप्या तया चैकवाक्यतानुमानमित्यर्थः (२) । ननु किन्तावदेकवाक्यत्वम् । न तावत् विशिष्टैकार्थान्वयबोधजनकत्वम् । प्रकृत एव तदभावात् नापि तदेकतात्पर्य्यकत्वं, विभिन्नतात्पर्य्यकेऽपि प्रसङ्गादिसङ्गतिसत्त्वादित्यत आह शिष्यानामवधानायेति प्रत्यक्षेति तु लिखनं भ्रमविजृम्भितमेव, आभासग्रन्थे (३) अकारासत्त्वात् प्रत्यक्षवित्यादौत्येव पाठः साधुः । प्रकृतग्रन्थस्य स्वरसस्खलितस्यैव लिखनयोग्यत्वादिति । फलत इति । फलयोरुपजीव्योपजीवकभाव एव प्रमानयोरपि जिज्ञासायाम्परम्परोपयुक्त इति नार्थान्तरमिति ।

साक्षाज्जिज्ञासोपयुक्तमाह स्वरूपत इति । अनुमित्यनुव्यवसायादेरिति लौकिकप्रत्यक्षे विषयस्य कारणत्वादिति

---

(१) सङ्गतिमदर्थ प्रतिपादकत्वमेवात्र सङ्गतिपदेन ग्राह्यं एकवाक्यत्वस्य ग्रन्थ एव वृत्तेः ।

(२) अनुमानग्रन्थः प्रत्यक्षग्रन्थैकवाक्यतावान् तत्प्रतिपाद्यार्थ सङ्गतिमदर्थप्रतिपादकत्वादित्येवं रूपमनुमानम् ।

(३) मूलग्रन्थे इत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुमितयस्तु सर्व्वाः साक्षात् परम्परया वा व्याप्त्यादिप्रत्यक्षोपजीवकाः । पुरस्कृतश्चायमुपजीवकतोत्कर्षः ।

यद्यपि सकलमेव प्रत्यक्षफलमुपजीवत्यदृष्टजननीं

भावः । आदिपदेनानुमित्यात्मकविशेषणज्ञानजन्यविशिष्टवैशिष्ट्य-प्रत्यक्षं संगृहीतम् ।

ननु प्रमिति विभाजकधर्म्मसामानाधिकरण्येनापि उपजीव्योपजीवकभावोऽनुमितिप्रत्यक्षयोः सम्भवत्येव । स एव कथं नादृत इत्यत आह पुरस्कृत इति । अयं तद्धर्म्मावच्छिन्नः समयः सङ्केतः, तत्परिच्छेदिकानुमितिस्तु इदं पदमलग्नकं असतिवृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वादित्यादिरूपा । मत्कर्त्तव्यतापरिच्छेदिका च इदं मत्कर्त्तव्यं, मत्कृतिं विना असत्त्वे सति मदिष्टसाधनत्वादित्यादिरूपा, एवमादिपदादिष्टसाधनतानुमितिरपि (१) बोध्याः, ननु तथापि प्रमिति विभाजकोपाध्यवच्छेदेन नोपजीवकता, प्रमिति विभाजकोपाधिः प्रत्यक्षत्वस्य ईश्वरज्ञानवृत्तित्वात्, तथाच क्व पुरस्कार इत्यत आह ईश्वरप्रत्यक्षमिति तथाच प्रमिति विभाजकोपाध्यवच्छेदेन नोपजीवकता, किन्तु फलतावच्छेदकावच्छेदेन, तच्च जन्यप्रत्यक्षत्वमेव इति भावः । दृष्टद्वारेति ।

यद्यपि अदृष्टजनकमपि दृष्टद्वारकमेव तथापि दृष्ट-

---

(१) यागो मदिष्टसाधनः मादृशाधिकारिप्रवर्त्तकप्रमाणशब्दबोधितकर्त्तव्यताकत्वात् इत्येवमिष्टसाधनत्वानुमानम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समयमल्कर्त्तव्यतादिपरिच्छेदिकामनुमितिम् ईश्वरप्रत्यक्षन्तु न फलं तथापि दृष्टद्वारकमिह तथात्वमादरणीयम् ।

इतरस्याविनिगम्यत्वात्, सर्व्वज्ञानुमितिकरणमिन्द्रियापेक्षोत्पत्तिकम् । अनुमितिं भावयतोऽपीश्वरज्ञानस्य तत्करणतानिर्व्वाहकप्रत्यासत्तिविरहेण तथात्वात् ।

मात्र(१) द्वारके तात्पर्य्यं, इतरस्य दृष्टादृष्टसाधारणस्य फलतावच्छेदकावच्छिन्नमुपजीव्योपजीवकभावं पुरस्कृत्यस्वरूपतस्तमाह सर्व्वमिति। अनुमितिमित्यादि। प्रत्यासत्तिः फलसामानाधिकरण्यरूपा, अतथात्वात् अकरणत्वात्, ननु प्रमितिकरणं प्रमाणम्, तच्च स्वरूपयोग्यं न च सर्व्वत्र स्वरूपयोग्ये फलसम्बन्धो मृग्यते, अरण्यस्थदण्डादीनामतथात्वात्, किञ्च फलसामानाधिकरण्यमपि परामर्शएवापेक्षणीयम्। अन्यथा एकस्य पुंसः परामर्शसत्त्वेऽन्यस्य परामर्शविधुरस्य व्याप्तिज्ञानवतोऽनुमित्यापत्तेः, तथाच तत्र(२)वश्यकत्वे करणेऽपि तत् (३) कुतो निवेशनीयम् इति चेन्न, ईश्वरज्ञानस्य

---

(१) ननु दृष्टमात्रद्वारकमपि अदृष्टाद्वारकत्वेमति दृष्टद्वारकं तदप्यसिद्धं प्रत्यक्षस्यापि संस्काररूपादृष्टद्वाराव्याप्तिस्मरणरूपानुमानोपजीव्यत्वादिति चेन्न अदृष्टशब्दस्य धर्म्माधर्म्मपरत्वात् ।

(२) परामर्शे ।

(३) सामानाधिकरण्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वं पुनरिन्द्रियं नानुमानाधीनजन्म मनःश्रवण-योरजन्यत्वात् ।

दृष्टद्वारा वा तथात्वमादरणीयम् । न चोत्पत्ति-मदपीन्द्रियं दृष्टद्वारकमनुमानमपेक्षते ।

अनुमितिं प्रति तथा कारणत्वाभावात्, उपादानप्रत्यक्षत्वेनैव तस्य कारणत्वात्, अन्यथा तस्य नित्यस्य तत्त्वे फलावश्यम्भावा-पत्तेः, न चेश्वरीयं ज्ञानं फलोपहितमेवेति वाच्यं, कारणता-निर्व्वाहकसम्बन्धेन फलानुपहितत्वात्, तत्र व्याप्तौ तथैव निवेशात्, अन्यथाऽनियमापत्तेः ।

न च कारणतायां सामानाधिकरण्यं न निविष्टं, इति वाच्यं, येन सम्बन्धेन ग्राहकान्वयव्यतिरेकौ तेन सम्बन्धेन कारणत्व-कल्पनस्यैवोचितत्वात्, अन्यथा अतिप्रसङ्गात्, तच्च सामानाधि-करण्येनेति दिक्, सामानाधिकरण्येन फलोपहितस्वरूपस्यैव उपजीव्योपजीवक भावः । जलपरमाणौ स्नेहानुत्पत्त्या तथा व्याप्ते-रनङ्गीकारात्, अप्रयोजकत्वादित्यर्थभावनिरूपणमिति कश्चित्, फलायोगव्यवच्छिन्नं कारणं करणमिति मतावष्टम्भेनेदमित्यपरे, स्वमते नित्यस्य इत्यादिव्याप्तेरप्रयोजकत्वमभिप्रेत्य आह दृष्टद्वारा वेति, तथा चादृष्टाद्वारकप्रमाणतावच्छेदक-सामानाधिकरण्येनोप-जीव्योपजीवकभावः प्रकृते पुरस्कृत इति भावः । उत्पत्ति-मदपीति । तथा चेन्द्रियत्वसामानाधिकरण्येन तथोपजीवकत्वं प्रकृते नास्तीति भावः, न चानुमितिकरणस्येश्वरज्ञानस्य इन्द्रि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथोपजीव्यं निरूप्यैवोपजीवकं निरूप्यत इति न नियमः क्वचित् कार्य्यं निरूप्यापि कारणनिरूपणात् इति चेत् किञ्चातः न हि सङ्गतिरनन्तराभिधानव्याप्या, आनन्तर्य्याभिधान-प्रयोजक-जिज्ञासा-जनज्ञान-विषयो ह्यर्थः सङ्गतिः ।

जायते च कार्य्ये कारणे वा ज्ञाते कार्य्यत्वस्य कारणत्वस्य वा ज्ञानात् किमस्य कारणं कार्य्यञ्चेति जिज्ञासा अतएव तयोर्द्वयोरेव सङ्गतित्वम् ।

यादिकं प्रत्युपजीवकत्वेन प्रत्यक्षकरणेऽपि अदृष्टाद्वारकोपजीवकत्वसत्त्वात्, एतदप्यनुमानसाधारणमिति वाच्यं, अदृष्टाद्वारकपदेनैव वारणात्, तदर्थश्च तज्जनकादृष्टाजनकत्वे सति तज्जनकत्वं न चेश्वरज्ञानस्य कार्य्यमात्रजनकस्यैतदस्तीति भावः, यत्र यत्र सङ्गतिस्तत्र तत्रानन्तराधिधानम्, तथा चोपजीवकत्वमेव सङ्गतिः ।

तच्चानुमानवृत्त्येव इति मूल एव सुव्यक्तं अतएव तथैव व्यवस्थापितं पुरस्कृत इत्यादिना इति भ्रमं निराकर्त्तुं भूमिकामारचयति अथेति, आनन्तर्य्येति । आनन्तर्य्याभिधानप्रयोजिका या जिज्ञासातज्जनकं यज्ज्ञानं तद्विषयो योऽर्थः सा सङ्गतिरित्यर्थः । सङ्गतिज्ञानस्य जिज्ञासाजनकत्वन्तु अन्वयव्यतिरेकाभ्यां सम्प्रतिपन्नवदित्यवधेयं, कार्य्यसामान्यज्ञानात्कार्य्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्थञ्चोपजीवकतायास्तुल्यत्वेऽपि न क्षतिरिति मन्तव्यम् । लाघवायात्रैवोपमानस्य सङ्गतिं प्रदर्शयति बहुवादीति । सुप्रसिद्धतया निरसनीयाल्पवादिविप्रतिपत्तिकत्वेन सुप्रतिपदतया चानुमान एव व्युत्पित्सोः प्रथमं जिज्ञासा नोपमानेऽप्रसिद्धत्वात् निरसनीयबहु-

---

विशेषे जिज्ञासा तया च गुरुणानिरूप्यत इति जिज्ञासायां आनन्तर्य्याभिधानप्रयोजकत्वं, घटादिजिज्ञासाजनकसामान्यज्ञानविषयेऽर्थे अतिव्याप्तिवारणायप्रयोजकान्तं, यद्यपि प्रकृतजिज्ञासाया अपि उपायेच्छात्वं अतस्तज्जनकेष्टसाधनताज्ञानविषये इष्टसाधनत्वे इत्यमप्यतिव्याप्तिः, तथापि तादृशजिज्ञासात्वावच्छिन्नकार्य्यंता-निरूपितकारणताशालित्वमिह बोध्यं तादृशजिज्ञासात्वावच्छिन्नत्वञ्च तादृशजिज्ञासात्वानतिरिक्तवृत्तिधर्म्मावच्छिन्नत्वं, अतस्तादृश-जिज्ञासात्वस्य कार्य्यंतानवच्छेदकत्वेऽपि न क्षतिः, न च विशिष्ट-सङ्गतिघटकैकदेशे अतिव्याप्तिः तथा कारणतायाः विषयता-सम्बन्धेनावच्छेदकतापर्य्याप्त्यधिकरणत्वस्य विवक्षितत्वात् हेत्वाभास-लक्षणवत् ।

इत्थञ्चेति सङ्गतिरनन्तराभिधानाव्याप्यत्वे चेत्यर्थः, तथाच प्रत्यक्षे उपजीव्यवदुपजीवकत्वमपि वर्त्ततां, न चैतावतापि क्षतिरिति भावः । अतएव तद्धर्म्मावच्छिन्नोपजीवकत्वपुरस्कारे विवादेऽपि न दोषः, परन्तु प्राचीनविचारस्तु मूलमनुरुद्ध्यैवेति ध्येयम् । लाघवाय तात्पर्य्यंलाघवाय-निरसनीयाल्पवादि-विप्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वादिविप्रतिपत्तिकत्वेनातिदुरूहत्वाच्च औत्सर्गिकीं रीतिमनुरुध्येदं तेन कस्यचिद्दुरूहे प्रथमं जिज्ञासोदयेऽपि न क्षतिः। तथाचावसरसङ्गत्योपमाननिरूपणमिति भावः यथा चावसरस्य सङ्गतित्वं तथा व्यक्तमाकरे।

शब्दान्तरसमयग्राहकं सप्रवृत्तिनिमित्तकत्वबोधकं सामान्यतो दृष्टमन्ततोऽदृष्टजनकप्रवृत्त्यौपयिकञ्चानुमानमपेच्यते निखिलमेवोपमानमितीहापि उपजीवकत्वमेव सङ्गतिरिति केचित्। सम्भवति चेह निरूपण-

---

पत्तिकत्वेनेति सुप्रतिपदतायां हेतुः एवमुत्तरत्र, ननु प्रतिबन्धकीभूतजिज्ञासानिवृत्तिरवसरः, सा च स्वरूपसत्येव उपयुज्यते प्रतिबन्धकाभावत्वात् तथाच तत्र लक्षणमव्याप्तमित्यत आह यथाचेति आकरे इति प्रतिबन्धकीभूतजिज्ञासानिवृत्तौ सत्यां वक्तव्यत्वज्ञानादेव जिज्ञासाजायते इति तस्यैव सङ्गतित्वं इति प्राचीनैरभिधानादिति अतएव "विरम्यत," इति ग्रन्थादिपरिसमाप्तौ तैरभिधीयत इति, जिज्ञासितार्थशीघ्रत्वमवसर इत्यपि कश्चित्। एवं प्रसङ्गोपि उपेक्षानर्हत्वादिकमेव सङ्गतिरिति ध्येयम्। विचारस्तु अनुमानालोकप्रसारिण्यामनुसन्धेयः।

शब्दान्तरेति उपमितिविषयीभूतभिन्नस्येत्यर्थः, उपमितिविषयीभूतस्य तु आह सप्रवृत्तिनिमित्तकमिति, गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वात् इत्याकारकमित्यर्थः, सर्वत्राह

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योरपि कार्य्यकारणभावः, अथ तत्पूर्व्वकमित्यादिसूत्रे तत्पूर्व्वकत्वेनानुमाननिरूपणात् तच्छब्देन व्याप्त्यादिप्रत्यक्षपरामर्शादेश्चापि सहचारप्रत्यक्षजन्यत्वादिना तन्निरूपणात् तस्य च प्रत्यक्षनिरूपणाधीनत्वात् । एवमुपमानभिन्नत्वेनानुमाननिरूपणमपि अनुमानापेक्षमिति संक्षेपः । तत्र लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीये करणस्य क्रियाभेदभिन्नमूर्त्तिकतया, क्रियालक्षणपूर्व्वकं तल्लक्षणमाह ॥११॥

अन्तत इति केचिदित्यस्वरसोद्भावनं तद्बीजन्तु बहुवादिसम्मतत्वादिति हेत्वसङ्गतिः ननु प्रत्यक्षानुमानयोः सङ्गत्यभिधानेऽपि तन्निरूपणयोः पौर्व्वापर्य्यनियमे किमपि प्रयोजकं नोक्तमित्यत आह सम्भवति चेति एवं निरूपणयोरपि कार्य्यकारणभावः सङ्गतिमुद्रया नो शङ्कितो येनार्थान्तरमाशङ्क्येतेति ध्येयं, ननु करणनिरूपण एव क्रियाया अपेक्षेति न युक्तम् अन्यथापि तन्निरूपणसम्भवादित्यत आह लक्षणस्वरूपेति लक्षणं तत्कारणमित्यादिना स्वरूपं तच्चेत्यादिना प्रामाण्यम् अथेत्यादिना एषु सर्व्वेष्वनुमित्यपेक्षेति भावः ।

अनुमानं निरूप्यत इति मूलस्यानुमानविशेष्यकान्वयबोधजनकत्वात्तस्यैव तत्पदेन परामर्शः इति तथैव व्याचष्टे तच्चेति ।

निरूपणीये इति सति सप्तमीविशेषणस्य निरूपणस्य विषय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र व्याप्तिविशिष्टपक्षधर्म्मताज्ञान-जन्यज्ञानमनुमितिस्तत्करणमनुमानम्।

व्याप्तीति तत्र व्याप्तिविशिष्टत्वपक्षधर्म्मत्व-सामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थः कर्म्मधारयोत्तर-भावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्य-वचनत्वात् ॥ १२ ॥

तया अनुमित्याधारत्वात् आधारसप्तमीयमतो न प्रथमान्तान्वय-विरोध इत्यपि कश्चित् ॥ ११ ॥

कर्म्मधारयेति कृत्तद्धितसमासेभ्यः सम्बन्धावगमः त्व-तल्भ्यामिति कात्यायनवचनादिति भावः ननु भावप्रत्ययस्य समानाधिकरणत्वेन तत्तत्पदार्थतावच्छेदकद्वयसमानाधिकरणत्वेन वा शक्तिः, आद्ये नीलत्वोत्पलत्वयोरेव लक्षणागौरवात् नीलोत्पल-पदादभेदान्वयानुभवापलापापाताच्च, द्वितीये। अनन्तशक्ति-कल्पनाप्रसङ्गात्, केवलघटत्वादौ च पृथक्शक्तिकल्पनम्। नील-घटीयनीलत्वघटत्वसामानाधिकरण्यं इत्याकारकानुभवाङ्गीकारे च अनुभवविरोधः, इत्येकदेशान्वयविरोधश्चेति, मैवं केवलघटत्व-मित्यादौ भावप्रत्ययस्य कृप्ताया एव शक्तेः प्रकृतार्थलाभात् तत्र हि घटेतरावृत्तित्वे सति सकलघटवृत्तित्वप्रकारेण घटत्वमुपस्थाप्यते,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानपदोपसन्धानेन च बाधितासाधारणतज्ज्ञानलाभान्नभ्रान्तानुमित्यव्याप्तिरित्याहुः। तन्न परामर्शेन नियमतो व्याप्तिवैशिष्ट्यादि सामानाधिकरण्यग्रहे मानाभावात्। गौरवेन च तद्विषयकत्वेनाहेतुत्वात्, सम्बन्धसम्बन्धाग्रहेऽपि विशिष्टज्ञानत्वस्योपपादितत्वात् ॥ १३ ॥

तत्र च प्रकृतित एव घटस्य लाभः इतरावृत्तित्वमित्यादावेव भावप्रत्ययस्य शक्तिः तत्रापि इतरः वृत्तित्वमभावश्चार्थः अन्यथा इतरवृत्तित्वाभावस्य वृत्तित्वाभावपर्य्यवसन्नतया (१) घटत्वादौ तद्बोधाप्रसङ्गात्, एवं इतरवृत्तित्वयोः सम्बन्धस्य शक्यत्वे गौरवाच्च। अस्मन्मते तु वाक्यार्थमर्य्यादयैव तल्लाभात् तथाच प्रकृतेऽपि नीलघटेतरावृत्तित्वादिनैवान्वयबोधः, न च सामानाधिकरण्यवचनत्वादिति ग्रन्थविरोधः नीलघटत्वस्यैव विवक्षितविवेकेन नीलत्वघटत्वसामानाधिकरण्यरूपत्वात् ॥ १२ ॥

न च नीलघटत्वमितिशब्दात् नीलकम्बुग्रीवादिमत्त्वबोधः स्यात्, सकलतद्वृत्तित्वं इत्यत्र तत्तत्समभिव्याहृतावृत्तित्वविशेषणतयैव तन्निरासात् नियमत इति

व्याप्तिविशिष्टवानित्यत्र तज्ज्ञानेऽपि व्याप्यवानित्यत्र सुतरां तदभावः। ननु तथा हेतुतैव तत्र मानं इत्यत आह गौरवेनेति।

---

(१) समनियतत्वेनेतरवृत्तित्वाभावस्य वृत्तित्वाभावादनतिरिक्तत्वादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भ्रमस्थले च तादृशसामानाधिकरण्याप्रसिद्ध्या तज्ज्ञानासम्भवात् असत्ख्यातिनिरासात् अवान्तरवाक्यार्थायोग्यत्वनिर्णये महावाक्यार्थज्ञानानुदयात्, विषाणे शशसम्बन्धाभावनिर्णयदशायां शशविषाणजन्यमिदं कार्म्मुकमित्यादिशब्दे शाब्दबुद्धेर्ब्रह्मणापि दुरुपपादत्वात् ।

न च प्रमाणप्रस्तावात् प्रमैव लक्ष्या यदि च सन्दिग्धपरामर्शादपि भ्रान्तानुमिति तदाचरमज्ञानपदं प्रमापरमिति वाच्यं अव्याप्यापक्षधर्म्मयोस्तत्त्वावगाहिनापरामर्शेन जनितायां वस्तुतः साध्यवत् पक्षावगाहितया प्रमायामव्याप्तेः । लिङ्गोपहित-लैङ्गिकभाननिरासिनांशिकभ्रमत्वस्याप्ययोगात् ॥ १४ ॥

ननु माभूत् तथा हेतुता मानं किन्तु विशिष्टज्ञानान्यथानुपपत्तिरेव मानं भविष्यतीत्यत आह सम्बन्धसम्बन्धाग्रह इति उपपादितत्वादिति ॥ १३ ॥

भवतामपि सम्बन्धसम्बन्धविषये तथेतरसमूहालम्बनवैलक्षण्येऽपि सम्बन्धसम्बन्धविषयकसमूहालम्बनतोऽविविक्ततादवस्थ्यं अतो विषयस्य ज्ञानयोर्व्विशिष्टज्ञाने प्रकारतासम्बन्धः समूहालम्बने च विशेष्यताख्यः सम्बन्धो भेदक इति, नन्वसदेवसामानाधिकरण्यं तत्र प्रसिद्धं इत्यत आह असत्ख्यातिनिरासादिति, ननु पूर्व्वप्रतीतस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ईश्वरतादृशज्ञानजन्यत्वस्यातिप्रसञ्जकत्वात् अत-एव व्याप्तिविशिष्टे पक्षधर्म्मता तज्ज्ञानं वा इत्यादिक-मपास्तम् । व्याप्तिविशिष्टस्य पक्षधर्म्मस्येति द्वन्द्वाश्रय-णात् व्याप्तिविशिष्टत्वपक्षधर्म्मत्वावगाहिज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदेऽपि पदार्थतावच्छेदकभेदेनैव प्रमाणप्रमेयेत्यादिसूत्रे अन्यत्र च द्वन्द्वस्य च दर्शनात् ॥ १५ ॥

तत्र बाधेऽपि ज्ञानपर्य्यन्तस्य तत्राबाध एव इत्यत आह अवान्तरेति लक्ष्येति तथाच ज्ञानपदं प्रमापरमिति भावः, यदि चेति गन्ध-प्रागभावावच्छिन्नो घटो गन्धवान् इत्यादावित्यर्थः, उपाध्यायमते सामानाधिकरण्येनेवानुमितिरिति यदि चेत्युक्तं अव्याप्येति धूलि-पटलधूमादावित्यर्थः ननु तस्याः अपि अनुमितेर्लिङ्गवत्त्वांशे भ्रमत्वं इत्यत आह लिङ्गोपहितेति ॥ १४ ॥

अतिप्रसञ्जकत्वादिति । ननु भ्रमानुमितौ तादृशविशिष्ट-ज्ञानरूपत्वस्य परामर्शत्वस्य ईश्वरज्ञाने असम्भव एव तस्य सन्मात्रा-वलम्बत्वात् तत्कथमतिप्रसङ्ग इति चेन्न सदनुमिति स्थलीयपरा-मर्शत्वस्य ईश्वरज्ञानसाधारणतया तज्जन्ये ज्ञानमात्र एव अति-प्रसङ्गसम्भवात् अतएवेति यत एव प्रथमानुमित्यव्याप्तिः अत एव इत्यर्थः । पदार्थतावच्छेदकभेदेनेति ननु नीलघटयोरित्यत्र तादात्म्यं कुत्रान्वेति न तावद्धर्म्मिणि तत्र बाधात् नापि धर्म्मिताव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदार्थद्वयाभेदबोधकाच्च कर्म्मधारयाद्भिदाद्भेदोदासीनपदार्थद्वयबोधजनकत्वेनैव द्वन्द्वस्य भेदात्। व्याप्तिविशिष्टपदस्य धर्म्मपरतया वा व्याप्तिवैशिष्ट्यपक्षधर्म्मतयोर्लाभात्। न चैव मालोकोवह्निव्याप्यो धूमवान् पर्व्वत इति ज्ञानजन्येऽतिप्रसङ्गः एकत्र तदुभयावगाहित्वस्य उक्तत्वादिति केचित् तदप्यसत् एवमपिधूमोवह्निव्याप्यो द्रव्यं पर्व्वतवृत्ति इति ज्ञानजन्येऽतिप्रसङ्गात् एकरूपेण (१) तदुभयावगाहित्वोक्तौ च मीमांसक-

च्छेदकयोः पदार्थतावच्छेदकत्वेन तत्राकाङ्क्षाविरहात् द्विवचनमत्र साधुतार्थमिति चेत् तर्हि कर्म्मधारय एवाङ्गीक्रियतां, किमर्थं द्वन्द्वस्य पदार्थतावच्छेदकपर्य्यन्तानुधावनमिति, मैवं पदजन्यपदार्थप्रतीतिविशेष्यरूपस्य पदार्थस्य भेदापेक्षयापदजन्यप्रतीतिविषयभेद एव द्वन्द्वः कल्पते लाघवात् कर्म्मधारयोत्तरं द्विवचनाननुशासनाच्च एवञ्च घटा इत्यत्रापि द्वन्द्वो न दुर्घटस्तत्र विशेष्यभेदात् प्रकृते तु प्रकारभेदादिति प्रमाणप्रमेयेत्यादि दर्शितं तेन समं यथाश्रुते द्वन्द्वानुपपत्तिर्द्रष्टव्या ॥ १५ ॥

ननु कर्म्मधारयस्थलेऽपि द्वन्द्वस्य विषयसत्वे कर्म्मधारयः पृथक् किमर्थमङ्गीक्रियत इत्यत आह कर्म्मधारयादिति

(१) नन्वेकधर्म्मावच्छिन्नधर्म्मिण्युभयावगाहित्वविवक्षणात् न धूमो वह्निव्याप्यो द्रव्यं पर्व्वतवृत्ति इति ज्ञानजन्येऽतिप्रसङ्ग इत्यत आह एकरूपेणेति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मतानुप्रवेशात्। मिथस्तदुभयोपश्लेषावगाहित्वस्य च परामर्शाऽव्यापकत्वात्॥ १६॥

न च तदुभयविषयत्वनियतधर्म्मावच्छिन्नकारणताप्रतियोगिककार्य्यताशालित्वमर्थः॥ १७॥

तथाचानुभवभेद एव उभयोः परस्परं भेदकः इत्यर्थः नन्वेकस्मिन्नेव चैत्रे चैत्रत्वतत्सम्बन्धानां पदजन्यप्रतिपत्तिविषयाणां भेदे कथं न द्वन्द्वः इत्यत आह व्याप्तिविशिष्टपदस्येति मीमांसकमतेति व्याप्यवानिति शाब्दपरामर्शस्थलीयानुमित्यव्याप्तिरित्यर्थः। (१) द्वितीयं पक्षं दूषयति मिथ इति तदुभयेति व्याप्तिविशिष्टत्वपक्षधर्म्मत्वोभयेत्यर्थ उपश्लेषः सम्बन्धः अव्यापकत्वादिति व्याप्तिविशिष्टवानित्यादौ कदाचित्तदङ्गीकारेऽपि व्याप्यवानित्यादौ सुतरामभावादित्यर्थः॥ १६॥

न च तदुभयेति प्रकृतपरामर्शत्वस्य तदुभयविषयत्वव्याप्यत्वाद्वह्निव्याप्योधूमो द्रव्यं पर्व्वतवृत्ति इत्यादौ च प्रत्यक्षं प्रति विषयत्वेन कदाचिज्ज्ञानप्रत्यक्षं प्रति ज्ञानत्वादिनोभयथापि तदुभयविषत्वव्याप्यत्वाभावादित्यर्थः।

न च तत्प्रत्यक्षे तत्त्वेनापि कारणत्वं तच्च तदुभयविषयत्वनियतमित्यव्याप्तितादवस्थ्यमिति वाच्यं मिश्रमते विषयस्य विशेषरूपेण कारणतायां मानाभावादिति तात्पर्य्यात्॥ १७॥

---

(१) मीमांसकैर्यथावह्निव्याप्यवानयं इत्यादि व्याप्यतावच्छेदकानवगाहिपरामर्शादनुमितिरपलभ्यते तथैवानुमित्यपलापो न्यायमतेपि स्यादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पक्षधर्म्मतापदोपादानवैयर्थ्यात्। व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्म्मताज्ञानं तज्जन्यमिति तु स्यात्। यद्यपि अत्रापि इन्धनसमानाधिकरणाभाव-प्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणे-न्धनवानित्यादिपरामर्शजन्येऽतिव्याप्तिः अखण्डव्याप्ते-रप्रसिद्धेः, भ्रमानुमितेर्लक्ष्यत्वे अत्राकाशमात्मन इत्यादौ सुतरां तथा, तथापि तावत्पदार्थानां तथाविधपरस्परो-पश्लेषावगाहित्वमात्रं विवक्षितम् ॥ १८ ॥

न च व्यतिरेकिण्यव्याप्तिः, व्यभिचारधीविरोधि-धीविषयत्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात्, भवति

पक्षधर्म्मतेति, न च व्याप्तिविषयत्वस्य वैयर्थ्यमेव किमिति नोदङ्कितं, पक्षधर्म्मतापदस्य पक्षवृत्तित्वपरतया साधारणधर्म्मव-द्धर्म्मिज्ञानादिजन्यसंशयादावतिप्रसङ्गात्, न चैवमपि व्याप्तिज्ञान-प्रत्यक्षेऽतिव्याप्तिरुक्तैवेति भावः। सुतरामिति, आत्मनोऽधि-करणाभावादिति भावः, तावत्पदार्थानां व्याप्तिघटकपदार्थानां तथाविधेति व्याप्तिज्ञाने यस्य पदार्थस्य येन येन सम्बन्धेन यत्र यत्र विशेषणत्वं तेन तेन तत्र तथात्वावगाहित्वमित्यर्थः, तच्चाधिकरणे साधनीयत्वं तादृशाधिकरणीयत्वं वृत्तौ वृत्तीयत्वमभावे तादृशा-भावीयत्वं प्रतियोगितायामित्याकारकमिति ध्येयम् ॥ १८ ॥

न च व्यतिरेकिणीति तत्र पक्षधर्म्मतांशे साध्याभाव-व्यापका-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियोगित्वे वा गृहीते नियमतो वह्निव्यभिचारधीविरोधः, तथाविधधूमसमानाधिकरणत्वादिकन्तु न तथा, रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात् व्यतिरेकसहचारेणान्वयव्याप्तिग्रहणाश्रयनाद्वा ॥ १८ ॥

न च भ्रमसंशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनस्य

भावप्रतियोगित्वस्य प्रकारत्वादित्यर्थः; ननु वह्न्यत्यन्ताभाववद्वृत्तिर्धूम इति व्यभिचारधीविरोधिनि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिरणधूमसमानाधिकरणरासभवानितिज्ञाने उक्तरूपसत्वात् तज्जन्य प्रत्यक्षेऽतिव्याप्तिरित्यत आह तथाविधेति न तथेति न पक्षधर्म्मतांशे व्यभिचारधीविरोधिधीविषयः, रासभादाविति धूमे व्यभिचारविरोधेऽपि पक्षधर्म्मताशालिनि रासभे व्यभिचाराविरोधादिति भावः।

ननु हेतुसमानाधिकरणेत्याद्यन्वयव्याप्तेरेव व्यभिचारविरोधित्वे विवादः कथं व्यतिरेकव्याप्तौ, किञ्च धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निवृत्तिवाच्यत्ववद्धूमवानिति ज्ञानजन्येऽनुव्यवसायेऽतिव्याप्तिः तस्य पक्षधर्म्मतांशे व्यभिचारधीविरोधित्वात्, सामानाधिकरण्याविषयत्वेन च अनुमित्यजनकत्वादित्यरुचेराह व्यतिरेकसहचारेणेति ॥ १८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुतामते तत्रातिव्याप्तिः, तथाविधनिश्चयत्वेन तस्य हेतुताया विवक्षितत्वात्, विशेषदर्शनस्य च भ्रमाविरोधित्वेन तत्त्वमित्युक्तत्वात्। अतएव लिङ्गवत्वादिलक्षणातिदेशवाक्यार्थज्ञानजन्योपमितौ नातिव्याप्तिः तथाविधवाक्यार्थप्रतिसन्धानेन च तस्य हेतुत्वात् ॥ २० ॥

न च उपनयार्थज्ञानजन्यन्यायार्थज्ञाने, तच्छब्देन शङ्केतितशब्दान्तरेण वा व्याप्यादिविशिष्टोपस्थितिद्वाराजनिते शाब्दबोधेऽतिव्याप्तिः। व्युत्पादयिष्यते हि महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थधीजन्यत्वं तदादेश्च विशेषरूपेणोपस्थापकत्वमिति वाच्यं तत्रातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशात् निश्चयत्वस्याप्रवेशाच्च ॥ २१ ॥

हेतुतामत इति मिश्रमत इत्यर्थः उपाध्यायमते विशेषदर्शनस्योत्तेजकत्वात्, स्वमते तु यत्कोटिव्याप्यदर्शनं तस्य तदभावकोटिबाधकत्वात् इत्युक्तत्वादिति मिश्रैरित्युक्तत्वादिति भावः। संशये सति व्यावर्त्तकधर्मदर्शने वा अन्धकारस्थलीयघटादिसंशयोत्तरमालोकादिसमवधाने वा एवं कुङ्कुमे गन्धसंशयानन्तरं तैलादिसमवधाने वा प्रत्यक्षस्य जायमानत्वात्तथैव हेतुत्वमिति, तथाविधेति अतिदेशवाक्यार्थज्ञानत्वेनेत्यर्थः ॥ २० ॥

न्यायेति प्राचीनमतेनेदम् स्वमते तु न्यायेन विशिष्टवैशिष्ट्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न च तथापि तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात्, तादृशशाब्दबोधे प्रत्यक्षे च अतिव्याप्तिः, दण्डो रक्तो न वेति संशये रक्तदण्डवानयम् इति ज्ञानानुदयादिति वाच्यम् ॥ २२ ॥

ज्ञानाजननादुपनयनिगमनाभ्यां जनिते बोधे अतिव्याप्तिर्बोध्या, ननु ग्रन्थकारमते महावाक्यार्थज्ञानं प्रति अवान्तरवाक्यार्थज्ञानं न कारणमित्यत आह तच्छब्देनेति, ननु प्राचीनमते बुद्धिस्थत्वप्रकारेणैवान्वयबोधः विशेषप्रकारेणान्वयबोधस्तु प्रयत्नसाध्यः, इत्यत आह सङ्केतितेति पदजन्यत्वस्येति बन्धूपदर्शितकलायाद्युपस्थितेर्व्वारणाय तस्यावश्यं वाच्यत्वादिति भावः। ननु पदज्ञानं करणं पदार्थज्ञानं व्यापारः पदपदार्थज्ञानयोश्च यस्येति पदज्ञानस्य स्मरण एव जनकत्वात्, तस्य च संशया नात्मकत्वेन ज्ञानत्वस्यैव समुचितत्वादिति भावः ॥ २१ ॥

शाब्दबोध इति पूर्व्वं खण्डवाक्यार्थज्ञानत्वावच्छिन्नहेतुतामादायातिव्याप्तिर्द्दत्ता इदानीं तु प्रत्यक्षादिसाधारणतत्तद्विशेषणतावच्छेदकप्रकारकहेतुतामादाय इति विशेषः। एवमुपमितावपि बोध्यं तत्र विवादय इति न लिखितं, दण्डो रक्तो न वेति, अयमाशयः विशिष्टवैशिष्ट्यज्ञानन्तावद्विशेषणमिति न्यायेन विशिष्टस्य वैशिष्ट्यमिति न्यायेन विशिष्टवैशिष्ट्यमिति न्यायेन वा रक्तदण्डवानित्यत्र द्वेधा छत्रीकुण्डली वासस्वी देवदत्त इत्यत्रैकत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञानोपरमेपि विशिष्टविषयोपधानेन इच्छाद्वेषयोः कृतेश्च साक्षात्काराद्विशेषणविषयकाद्विशिष्टसंस्काराद्-

---

द्वयमिति न्यायेन एकविशेषणविशिष्टेऽपरविशेषणान्वय इति न्यायेन च द्वेधाभिप्रेयते तत्र च विशिष्टस्य वैशिष्ट्यविषयकरूपं यदनुभवसाक्षिकं विशिष्टवैशिष्ट्यज्ञानं तत्र संशयात्मके निश्चयात्मके वा विशेषणतावच्छेदकप्रकारकानुभवसाक्षिके वैशिष्ट्यप्रकारक-निश्चयो हेतुः रक्तोदण्डो न वेति संशयानन्तरम् औचित्यावर्जितो रक्तदण्डवान् न वेति संशयः स तु विशेषणमिति न्यायेनैव जायते अतएवातिरिक्ते विशिष्टवैशिष्ट्यबोधे मानं नास्ति विशिष्टद्वयविषयकमेव ज्ञानमर्थवशसम्पन्नं विशिष्टवैशिष्ट्यरूपमिति मिश्रमतमपास्तम्। दण्डोरक्तो न वेति संशयानन्तरमजायमानस्य रक्तोदण्ड इति ज्ञानानन्तरं जायमानस्य संशयनिश्चय साधारणस्य विलक्षणज्ञानस्य दुरपह्नवत्वात् इदं पुनरत्र रक्तोदण्डो न वेति संशयानन्तरमौचित्यावर्जितस्य रक्तत्वरक्तत्वाभाववद्दण्डनिरूपित-वैशिष्ट्यावगाहिसंशयस्य रक्तत्वनिरूपितदण्डवैशिष्ट्यवैलक्षण्यमापाद्य रक्तदण्डनिरूपितवैशिष्ट्यावगाहिसंशयस्य रक्तत्वे निरूपित-दण्डांशे वैशिष्ट्यवैलक्षण्यमापाद्य रक्तदण्डनिरूपितवैशिष्ट्यावगाहि-विशिष्टबोधात्मके सुधीभिश्चिन्त्यमिति ॥ २२ ॥

इच्छाद्वेषयोर्निर्विकल्पकं प्रति कदाचिदिच्छाद्वेषाव्यवहित प्राक्कालोत्पन्नज्ञानादेव तत्सम्भवेऽपि विनश्यदवस्थज्ञानजन्येच्छाद्यनुसरणायासादाह कृतेरिति। साक्षात्कारोऽत्र निर्विकल्पक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रविशिष्टस्मरणाच्च तद्विषयकगुणानां तत्र हेतुत्वे न्यूनवृत्तेर्ज्ञानस्याप्रवेशात् ॥ २३ ॥

इच्छादितः संस्काराच्चानुमित्यनुदयात् संस्काराद्यन्यत्वस्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात् ॥२३।१॥

रूपः, सविकल्पकस्य विषयांशे सविकल्पकक्तित्वांशनिर्व्विकल्पकतः एव सम्भवात् क्तिनिर्व्विकल्पकतः एव सम्भवात् क्तिनिर्व्विकल्पकपूर्व्वं सन्निकर्षार्थमपि विषयस्मृतिस्वाकारादाह विशेषण विषयकादिति । अत्र च निर्व्विकल्पकात्मकस्मरणं सिद्धान्तविरुद्धमिति भावः ॥ २३ ॥

गुणानामिति । ननु विशेषणतावच्छेदकप्रकारक गुणत्वेन हेतुत्वे सत्त्वं किमित्युपेक्षितम्, विशेषण विषयकत्वमेव वा हेतुतावच्छेदकमस्तु अलं गुणत्वानुधावनेनेति चेन्न, प्रकारतासम्बन्धेन विशेषणतावच्छेदकवत्संशयान्यत्वेन कारणत्वात्, गुणत्वविषयित्वयोरप्रवेशात्, न च दण्ड इति स्मृतिमतः पुरुषोदण्डी न वेति संशयानन्तरं दण्डिनं पुरुषं सन्देह्मि इत्यनुव्यवसाये व्यभिचारः, विशेषणतावच्छेदक प्रकारकस्य दण्डीति निश्चयस्य तत्राभावादितिवाच्यं, नैयायिकमते प्रामाण्यस्य स्वतस्त्वापत्तिभयेन व्यवसाय विशेषणालिङ्गित विशेष्यीयत्वस्य व्यवसायेऽनुव्यवसाये नाविषयीकरणात्, न च रक्तदण्डांशे अनुद्बुद्धसंस्कारसत्त्वात् इति वाच्यं तत्र प्रत्यक्षस्य रक्तदण्डांशे सन्निकर्षं विनैवाभावात्

5114

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न च परामर्शानुव्यवसायेऽतिव्याप्तिः सामान्यतः प्रत्यक्षविषयत्वे न तत्तद्विषयकप्रत्यक्षे तत्त्वेन कादाचित्कज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तत्र हेतुत्वं न तु यावानेव तत्तदितरत्वादेर्व्विषयनिष्ठो धर्म्मः तेन तद्विषयकत्वेन च कार्य्यकारणभावः ॥

स्मृतिस्तूद्बोधकाभावादेवाभावात् न च तथापि विनिगमनाविरहादुपनय एव गुणत्वेन प्रयोजकत्वमस्तु विशिष्टवैशिष्ट्यबोधे तु ज्ञानत्वेनेति वाच्यं रक्तदण्डगोचरसंस्कारवतस्तल्लौकिकसन्निकर्षविधुरस्य रक्तदण्डगोचरनिर्व्विकल्पकापत्तेः न चेष्टापत्तिः उत्तरकाले विशिष्टज्ञानस्यानुभवबाधितत्वादिति सम्प्रदाय विदः। अत्रेदं चिन्त्यं रक्तो दण्डो न वेति सन्देहवतो रक्तदण्डगोचरानुद्बुद्धसंस्कारशालिनश्च रक्तदण्डवानिति विशिष्टवैशिष्ट्यबोधापत्तिर्दुर्वारैव, विशेष्यांशे लौकिकसन्निकर्षसत्त्वात् रक्तदण्डगोचरस्य सन्देहरूपस्य उपनयस्य सत्त्वात् तत्र विशिष्टवैशिष्ट्यबोधस्वीकारे पूर्व्वत्रापि तत् स्वीकारो दुर्वारः एवं प्रकृष्टदीर्घदण्डगोचरलौकिकसन्निकर्षवतस्तत् गोचरानुद्बुद्धसंस्कारवतश्च प्रथमत एव दीर्घदण्डवानिति विशिष्टवैशिष्ट्यबोधापत्तिः सर्वेषामेव मते प्रथमतो न तत्र विशिष्टवैशिष्ट्यबोधः ज्ञानत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्वे तु तद्विलम्ब इति। ननु अनुमितावपि विशिष्टवैशिष्ट्यबोधवत् संशयान्यगुणत्वेनैव हेतुत्वमस्तु लाघवादित्यत आह इच्छादित इति ॥ २३।१ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मैत्रावलोकित चैत्रनिर्म्मित नीलेतर घटतद्विषयत्वादिना तद्वितुत्वे अनन्तकार्य्यकारणभावप्रसङ्गात् मानाभावात् अन्यथोपपत्तेश्च । अथ विशिष्टस्मरणेऽतिव्याप्तिः नचोपेक्षान्यत्वेन तत्र हेतुत्वं उपेक्षात्वं हि न जातिः, चाक्षुषत्वादिनाजाति सङ्करप्रसङ्गात्, आंशिकत्वोपगमाच्च ॥ २४ ॥

नापि प्रवृत्तिनिवृत्त्यजनकत्वम् अजिज्ञासितविषयत्वम् वा तादृशादपि स्मृत्युत्पादात् नापि संस्काराजनकत्वम् तज्जनकतावच्छेदकरूपान्तरापरिचयादन्योन्याश्रयप्रसङ्गात्, संस्कारानुत्पत्त्यैव अस्मरणसम्भवे स्मृतिजनकतायां तदप्रवेशाच्च नाप्यनुभवत्वेन तथात्वं

ननु तादृशकार्य्यान्यथानुपपत्तिरेवमानमित्यत आह अन्यथोपपत्तेश्चेति । जातिसङ्करप्रसङ्गादिति उपेक्षात्वं विहाय चाक्षुषत्वं घटप्रत्यक्षादौ चाक्षुषत्वं विहाय त्वाचादौ वर्त्तमानं उपेक्षात्वं चाक्षुषे उपेक्षाज्ञाने सङ्कीर्णमिति । चाक्षुषत्वादिव्याप्यमुपेक्षात्वं नानैव वक्तव्यं तावद्भेदकूटो निवेशनीयः इत्यत आह आंशिकत्वोपगमाच्चेति एकस्मिन्नेव ज्ञाने अंशत उपेक्षा अंशतोऽनुपेक्षा इति भावः, (१) तज्जनकतावच्छेदकरूपान्तरापरिचयादिति ॥ २४ ॥

---

(१) जातेर्व्याप्यवृत्तित्वनियततया अव्याप्यवृत्तित्वेनापादकेन अत्र जातित्वाभावः आपाद्यत इत्याशयः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्कारस्य फलनाश्यतयासकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसङ्गात् समानाकारस्यैव फलस्य नाशकत्वात् ॥ २५ ॥

समूहालम्बनादितो नैकैकगोचरक्रमिकस्मरणानुपपत्तिः, जायते च पुनः पुनः स्मरणाद्दृढतरः संस्कारः ॥

अन्योन्याश्रय एव हेतुः भवति हि उपेक्षान्यत्वे ज्ञाते संस्कारजनकत्वज्ञानं तस्मिंश्च उपेक्षान्यत्वज्ञानमिति, क्वचित् रूपापरिचयादिति पाठः तथाच अवच्छेदकाग्रहे जनकत्वाग्रह इति स्वतन्त्रं दूषणम्, ननु माभूदन्यदवच्छेदकम् उपेक्षान्यत्वमेवावच्छेदकं भविष्यतीत्यत आह अन्योन्याश्रयादिति ।

ननु तत्त्वेन तत्त्वेनैव संस्कारजनकता, तावद्भेदकूटवत्त्वम् उपेक्षात्वम् इति कुतोऽन्योन्याश्रय इत्यत आह संस्कारानुत्पत्त्यैवेति अस्मरणसम्भवे उपेक्षणीयास्मरणसम्भवे तदप्रवेशादिति उपेक्षान्यत्वस्याप्रवेशादित्यर्थः ।

सकृदिति वारान्तरानुभवे च तत एव संस्कारस्य फलनाश्यत्वे प्रथमस्मरणेनैव समूहालम्बनसंस्कारनाशात्तदुत्तरं तद्विषयान्तरस्मरणानुपपत्तिरित्यत आह समानाकारस्येति प्रथमस्मरणस्य समूहालम्बनासमानाकारत्वादिति भावः आदिपदेन घटवद्भूतलम् ॥ २५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परित्यज्य च निश्चितव्यभिचारकं रूपं गृह्यमाणाव्यभिचारकेण कारणत्वकल्पनानुदयात् ॥ २६ ॥

इदमेव चान्यत्र सामान्यकारणतावच्छेदकत्वे वीजम् अभिहितञ्च तात्पर्य्यटीकायाम् प्रथमसूत्रे अवयवविवेचनाप्रस्तावे मिश्रैः, स्मृतीणां स्वकार्य्यविरोधिनीनाम सह भावादिति चेन्न चरमज्ञानपदस्यानुभवपरत्वात्, साक्षात्तज्जन्यत्वस्य च विवक्षितत्वादिति कश्चित् ॥ २७ ॥

ननु समूहालम्बनसंस्कारस्य चरमस्मरणत एव कुतो नाशः तस्यापि तदसमानाकारत्वात् तस्य कालादिना नाशोपगमे फलस्य नाशकत्वव्यभिचारः तत्त्वेन तत्त्वेन नाशकत्वे सकृदनुभूतस्यापि चरमस्मरणमेव नाशकमित्यस्वरसादाह जायते चेति, दार्ढ्यं संस्कारगतो जातिविशेषः तच्च झटिति स्मरणादिफलैरेव कल्प्यते इति भावः ।

ननु झटिति स्मरणादिकं तथाविधोद्बोधकसमवधानाद्भविष्यति न च प्रत्यक्षं तत्र मानं, तादृशजातेरतीन्द्रियत्वोपगमात् इत्यत आह परित्यज्य चेति, ननु तथापि संशयान्यत्वं तत्र जनकतावच्छेदकं न च संशयस्थले स्मृत्यापत्तिः उद्बोधकाभावात् उद्बोधकस्य च विशिष्यैव कार्य्यकारणभावात् ॥ २६ ॥

न च संशयस्थले संस्कारकल्पना तस्य च नाशकादिकल्पनेति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किञ्च व्याप्यविशिष्यकात्पक्षविशिष्यकाद्वा परामर्शादनुमितिदर्शनात् तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं लक्षणघटकमपि तदेव एकतरविशिष्यकज्ञानादन्यतरविशिष्यकस्मरणाभावात् अन्यथा नियमेन स्मृतेरुभयविशेष्यकत्वप्रसङ्गात् ॥ २८ ॥

वाच्यं संस्कारजनकतायां तत्प्रवेशेऽपि स्मृतिजनकतायां तत्प्रवेशे गौरवादिति चेन्न अनतिप्रसक्तरूपेणैव कारणतायाः सम्प्रदायसिद्धत्वात् अन्यथा सत्त्वादिनापि कारणतापत्तेर्दुर्व्वारत्वादिति स्वकार्य्यविरोधिनीनां स्वकार्य्यकृतौ यो विरोधो विनाशः तद्वतामित्यर्थः, कश्चिदित्यस्वरसोद्भावनं तद्बीजन्तु साक्षात्त्वं न तावदव्यवहितोत्तरक्षणजन्यत्वं विनश्यदवस्थपरामर्शजन्यानुमितावव्याप्तेः न तावत्तज्जन्याजन्यत्वे सति तज्जन्यत्वं परामर्शजन्यसिद्धिनाशजन्यानुमितावव्याप्तेरित्यादिस्वयमुह्नीयम् ॥ २७ ॥

प्रकारान्तरेणापि स्मरणेऽतिव्याप्तिनिराशसम्भवे ज्ञानपदस्य किमर्थमनुभवपरत्वमित्यत आह किञ्चेति विशिष्यैव कार्य्यकारणभाव इत्यत्र प्रथमतो हेतूनाह एकतरेत्यादि अन्यथा विशिष्यकार्य्यकारणभावं विना अनियमेनेति क्वचित् पाठः। तत्र कार्य्यकारणभावानियमो बोध्यः एवं उभयवैशिष्ट्यावगाहिज्ञानत्वेन कारणत्वे चकारोऽस्वरससूचनाय स च पूर्व्वोक्त एव ॥ २८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समानप्रकारकत्वेनैव ज्ञानस्मरणयोः कार्य्यकारणभावात् तत्र विशिष्यैव कार्य्यकारणभावः नतूक्तरूपेण गौरवान्मानाभावाच्च इत्यपि केचित् एवञ्च विशिष्टवैशिष्ट्यबोधादौ क्वापि नातिप्रसङ्गशङ्कापि वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविरोधिधीविषयधर्म्मप्रकारकपक्षधर्म्मताज्ञानत्वेन हेतुतामते तु नितरां तथैव लक्षणे निवेशात् अतएव व्याप्यवत्पक्षाद्यभावज्ञानं प्रति व्याप्यवत्पक्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः ॥ २८ ॥

व्याप्तिविषयत्वेन वा जन्यं ज्ञानं विशेषणीयम्,

येषां मते विशिष्टवैशिष्ट्यबोधसामान्यं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयस्य न हेतुत्वं तन्मतेऽप्यभावबुद्धिर्व्विशिष्टवैशिष्ट्यबोधरूपैव तत्र च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानं हेतुरिति तत्र पृथगतिव्याप्तिं वारयति अतएवेति ।

अतएव उभयवैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वं विवक्षितमित्यर्थः आदिपदात् येषां मते व्याप्यविशिष्यकपरामर्शः कारणम्, तन्मते तादृशाभावस्यापि संग्रहः (१) ॥ २८ ॥

ननु उभयवैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वे वह्निव्याप्ये पर्व्वत इति ज्ञानादप्यनुमित्यापत्तिः । न च पर्व्वतस्य आधारत्वाव-

---

(१) पक्षवृत्तिव्याप्याभावस्य आधेयतया पक्षवत्व्याप्याभावस्य च संग्रह इत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतेन स्मृतिं प्रति संस्कारद्वारा अनुभवं प्रति च साक्षाद्विशेषणधियो हेतुत्वस्य निर्व्विकल्पात्मकस्य वा स्मरणस्य अनुभवं प्रत्येव वा तस्याहेतुत्वस्य नियमतः कृतिसाक्षात्कारपूर्व्वं विषयस्मृतेश्च कल्पनात् व्याप्यवत्पक्षादिज्ञानेऽतिव्याप्तिरित्यपि परास्तम् ॥ ३० ॥

गाहिज्ञानत्वेन कारणत्वम्, पर्व्वते वह्निव्याप्य इति ज्ञानाव्याप्यत्वात् (१) एवं व्याप्यस्य आधेयत्वावगाहित्वविवक्षणेऽपि वह्निव्याप्यवान् पर्व्वत इत्यत्र अव्याप्तिर्बोध्या न च एकत्र तदुभयभाने प्रमाणमस्ति, न च वह्निव्याप्यवान् न वेति संशयविरुद्धोभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वं, एतन्मते पर्व्वते वह्निव्याप्य इति ज्ञानस्य भिन्नप्रकारतया तथा, संशयाविरोधित्वात् अयं वह्निव्याप्यत्वावच्छेदकधर्म्मवान् पर्व्वतवांश्च वह्निव्याप्य इति ज्ञानादप्यनुमित्यापत्तेः। विशिष्टवैशिष्ट्यबोधविलक्षणहेतुत्वाद्युक्तनिखिलविवक्षणे न तथा, ननु स्मृतिस्थले संस्कारद्वारा कारणत्वमनुभवे तु साक्षात्सम्बन्धेनेति सम्बन्धभेदात्कारणताभेदः इत्यत आह निर्व्विकल्पकेति।

ननु निर्व्विकल्पकस्मरणं सिद्धान्तविरुद्धमित्यत आह अनुभवमिति दैवादिति साध्यतावच्छेदककोटौ पक्षतावच्छेदककोटौ

---

(१) इति ज्ञानेऽव्याप्तिरिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यादेरननुगमात् एकत्रोपादानेऽन्यानुमितौ दैवाद्व्याप्तिविषयिण्याञ्च अव्याप्तिः परमवशिष्यते, सापि तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया निरसनीया एतल्लाभायैव चानुभवार्थकं चरमज्ञानपदम् । एवञ्चान्वयव्यतिरेकव्याप्त्योः पृथक्प्रयोजकत्वेऽपि न क्षतिः ।

पर्व्वतवह्निव्याप्यवैशिष्ट्यावगाहिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्य्यताया वह्निव्याप्यवत्पर्व्वतनिश्चयत्वावच्छिन्न-कारणताप्रतियोगिक-व्याप्तिविषयकवृत्तिकार्य्यताया वा अवच्छेदिका ज्ञानवृत्तिः सामा-

---

वा व्याप्त्यवगाहिन्यां समूहालम्बनरूपायां वा एवं जातिघटितलक्षणकरणे ॥ ३० ॥

ननु तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजात्यपेक्षयालघुलक्षणमाह पर्व्वतेति तत्र च तादृशकार्य्यताश्रयवृत्त्येवानुभवत्वव्याप्यजातिः इह तु तादृशकार्य्यतावच्छेदिकाजातिः इति विशेषः, ननु उभयवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वं पूर्व्वमेव दूषितम्, न च तथापि विनिगमनाविरहात् पर्व्वते वह्निव्याप्य इति निश्चयत्वेन हेतुत्वमस्तु, परामर्शस्यामितिसमानाकारस्यैव विनिगमकत्वात्, अनुरपि विशेषोऽध्यवसायकर इति न्यायात् अनुमितेश्च पक्षविशेष्यकत्वनियमादित्यभिप्रेत्याह वह्निव्याप्यवदिति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाधिकरण्येनावच्छेदिका वा या जातिस्तद्वत्त्वं वा बोध्यम् ॥ ३१ ॥

व्याप्तिभानेऽवश्यं भासमानो यस्तादृशानुमित्य-विषयोऽर्थस्तदविषयत्वमात्रं वा ग्राह्यं, यां काञ्चिदनु-

---

नन्ववच्छेदकत्वमवच्छेदकत्वकोटिप्रविष्टत्वमवश्यं वाच्यं, वह्न्य-नुमितित्वादेरेव कार्य्यतावच्छेदकत्वात् तथाच वह्नित्वमादाय वह्न्यावतिव्याप्तेरित्यत आह ज्ञानवृत्तिरिति, ननु ज्ञानानुमितित्वं यत्र कार्य्यतावच्छेदकं तत्र ज्ञानत्वस्यापि तथात्वादतिव्याप्ति-स्तदवस्थैव एवं केवलवह्न्यनुमितित्वमपि नावच्छेदकं वाच्यं, तथाच परामर्शकुक्षिनिक्षिप्त ज्ञानत्वमादायातिव्याप्तिस्तदवस्थैवेति अस्वरसादाह सामानाधिकरण्येनेति, कार्य्यकारणभावज्ञाने कार्य्य-तासामानाधिकरण्येन यस्याभानं इत्यर्थः। वह्नित्वज्ञानत्वादेश्च कार्य्यतावच्छेदकत्वसंस्पर्शाभावादिति भावः ॥ ३१ ॥

तादृशानुमित्यविषय इति साध्यादिवारणाय तथाच व्याप्य-विषय इत्यत्र अभावाद्यविषयक इत्यर्थः। अयञ्च लाघवमभि-प्रेत्य व्याप्यविषयकेत्यस्य निष्कर्षः कृतः, ननु वह्निव्याप्यवत्पर्व्वत-निश्चयत्वेनापि न हेतुत्वम्। आलोकधूमसाधारणव्याप्तेरेक-धर्म्माभावात् न च वह्निव्याप्यधूमवान् पर्व्वत इति परामर्शत्वेन हेतुत्वं तदुत्तरवह्न्यनुमितित्वेन कार्य्यत्वं एवं आलोकादावपि इति वाच्यं, सर्व्वासामेवानुमितीनां तदुत्तरत्वात् न च तदुत्तरत्वे सति तत्कालीनानुमितित्वमेव कार्य्यतावच्छेदकमिति वाच्यम्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुभवत्वान्यानुभवान्यासमवेतधर्म्मसमवायित्वमिति वा वक्तव्यम्। अनुभवत्वजात्यनङ्गीकारे तु तद्व्यक्तिसमवेतस्मरणासमवेतधर्म्मसमवायित्वं वक्तव्यम्॥ ३२॥

वह्निव्याप्यालोकापरामर्शाज्जायमानायां वह्निव्याप्यधूमवत्पर्व्वतावगाहिन्यां वह्न्यनुमितौ व्यभिचारात्। नच वह्निव्याप्यधूमवान् पर्व्वत इत्येतत्पर्व्वतज्ञानातिरिक्तपर्व्वतज्ञानाजन्यपर्व्वतो वह्निमानित्यनुमितित्वेन कार्य्यता उभयपरामर्शजन्यानुमितौ तु पृथगेव कार्य्यतेति वाच्यं अन्योन्याश्रयात्। तादृशपर्व्वतज्ञानाजन्यत्वे गृहीते एतत्पर्व्वतज्ञानजन्यत्वं ग्राह्यं गृहीते वास्मिंस्तद्ग्राह्यमिति। न च वह्निव्याप्यधूमवान् पर्व्वत इति परामर्शाव्यवहितोत्तरानुमितित्वमेव कार्य्यतावच्छेदकमिति वाच्यम्। अव्यवहितत्वस्य तदधिकरण-क्षणध्वंसाधिकरण-क्षणध्वंसानधिकरणत्वे सति तदधिकरण-क्षणध्वंसाधिकरणत्वरूपस्य तत्तद्व्यक्तिविश्रान्ततया तथाविधपरामर्शस्य हेतुत्वे मानाभावात् कुतस्तथाविधलक्षणावतार इत्यभिप्रेत्याह यामिति।

केचित्तु परामर्शवदनुमितित्वेन कार्य्यतामतुवर्थस्तु अव्यवहितोत्तरत्वं सम्बन्धाननुगमस्तुनदोषाय स्वरूपसम्बन्धादौ तथोपगमात्। अन्यथा घटपटत्वादिकमपि दुर्व्वचं तद्भिन्नोत्तरटत्वम्, तच्च सर्व्वटकारसाधारणमिति घाव्यवहितटत्वं वाच्यं, तच्च प्रत्येकविश्रान्तमिति एवं शक्तिग्रहाभावे व्यवहारविलोप इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्ये तु परामर्शत्वेन कारणता अनुमितित्वेन च कार्य्यता परामर्शत्वञ्च जातिविशेषः न च चाक्षुषत्वादिनासङ्करः सर्व्वत्र परामर्शस्य मानसस्यैवाभ्युपगमात्। न च तादृशजातौ मानाभावः कार्य्यकारणभावान्यथानुपपत्तेरेव मानत्वात् इत्याहुः। नवीनाः पुनः प्रकृतलक्षणं रचयन्तो वर्णयन्ति यत्र कुत्रचित् विशेषे एकेनैव व्याप्येन व्यापकस्यानुमितिर्जाता तत्र तादृशपरामर्शत्वेन तादृशानुमितित्वेन कार्य्यकारणभावो बाधकं विना सुघट एव, तथाच तामनुमितिमादाय जातिगर्भलक्षणं सम्यगिति। प्रत्यक्षत्वादिवारणाय तद्व्यक्तिसमवेतेति।

तथापि प्रत्यक्षत्वादिर्विषयतया कालिकविशेषणताविशेषेण-चानुमितिवृत्तित्वात् समवेतेति। अनुभवत्ववारणाय अनुभवत्वान्येति ज्ञानत्वादेर्व्वारणाय अनुभवान्यासमवेतेति ननु अनुभवान्यासमवेतेति व्यर्थं अनुभवत्वान्येति पदेनैव वारणात् अनुभवत्वावच्छिन्नभेदस्य सकलानुभववृत्तिभेदपर्य्यवसन्नतया ज्ञानत्वादेरपि वारणात् (१) अनुभवत्ववृत्ति एतत्वमेव प्रतियोगितावच्छेदकं अत्र अनुभवत्वं हि अनुभव इति ज्ञानप्रकारत्वं न तु अनुभवेतरावृत्तित्वे सति सकलानुभववृत्तित्वं अतो न ज्ञानत्वादिवारणमिति तस्यापि अनुभवान्यमहाकालवृत्तित्वात् असम्भववारणायासमवेतेति, तादृशधर्म्मस्य महाकालवृत्तित्वात् तत्रातिव्याप्तिवारणाय समवेतेति बोध्यम्॥ ३२॥

---

(१) अनुभवत्वत्वं सकलानुभववृत्तित्वं तच्च ज्ञानत्वेऽपि वर्त्तते इति ज्ञानत्वानुभवसाधारणं तदवच्छिन्नप्रतियोगिकभेदवच्च ज्ञानत्वमिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्य्य--तावच्छेदकावच्छिन्ना या, विशिष्टपरामर्शत्वावच्छिन्न-कारणता-प्रतियोगिककार्य्यता, तत्समानाधिकरणानु-भवत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि कश्चित् ॥ ३३ ॥

परे तु पक्षधर्म्मतेत्यत्र पक्षता विशेषणं तथाच पक्षतासहकृततादृशपरामर्शजन्यत्वमर्थः, यथोक्ताया विशेष्याद्यभावरूपाया वा पक्षतायाः प्रत्यक्षवारणाय परामर्शस्योपादानं तत्त्वेन जनकत्वमेकावच्छेदेन तदु-

---

व्याप्तिज्ञानत्वेति अनुमितौ व्याप्तिज्ञानं करणं परामर्शो व्यापार इति करणव्यापारयोरेकमेव कार्य्यतावच्छेदकमित्यभिप्रायेणेदं तत्राद्यं दलं व्याप्यवह्निविशिष्टवैशिष्ट्यबोधादिवारणाय, द्वितीयं तु व्याप्तिज्ञानप्रत्यक्षादिवारणाय, कश्चिदित्यस्वरसोद्भावनं तद्बी-जन्तु व्याप्तिज्ञानत्वस्य कारणतावच्छेदकत्वमेव खण्डितमिति एवं परामर्शस्य कार्यतावच्छेदकं पक्षविशेषादिघटितं व्याप्तिज्ञानस्य कार्य्यतावच्छेदककोटौ तन्निवेशनमफलमिति ॥ ३३ ॥

पक्षतासहकृतेति मिश्रैर्विवक्षितं तच्च शब्दतः कथं लभ्यत इत्यत आह पक्षधर्म्मतेति ।

तथाच विशिष्टज्ञानत्वेनैव विशेषणजन्यत्वमपि लभ्यत इति भावः यथोक्ताया मिश्रमते योग्यतायाः कालघटितत्वेन,अन्यमतेऽपि सिषाधयिषाविरहवैशिष्ट्यांशे कालस्य निवेशने च योग्यानुपलब्धि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भयजन्यत्वञ्च विवक्षितं तेन बाधादिकालीनेन दैवात् प्रतियोगिविषयकेण परामर्शेन जन्ये पक्षतायाः प्रत्यक्षे, तदुभयसमूहालम्बने वा नातिप्रसङ्गः। तद्वृत्त्यनुभवत्व-व्याप्यजातिमत्त्वविवक्षया च नाव्याप्तिरित्याहुः तच्चि-न्त्यम् ॥ ३४ ॥

तत्करणमिति। न च व्याप्यत्वादिज्ञानजन्यज्ञान-करणत्वेनेतरभेदसाधने व्याप्तिज्ञानत्वं तादात्म्यसम्ब-न्धेन व्याप्तिज्ञानमेव वा गमकं व्याप्तेरननुगमेऽपि अधि-

---

विवादादाह विशेष्याद्यभावरूपाया वेति क्रमेण व्यावृत्तिमाह तेनेत्यादि बाधादिकालीनेत्यनेनानुमितिव्युदासः प्रतियोगि-विषयकेनेति सिद्धिविषयकेनेत्यर्थः सिद्ध्यभावप्रत्यक्षे विषयतया सिद्ध्यभावस्य हेतुत्वं परामर्शस्य च सिद्धिज्ञानात्मकतया प्रति-योगिज्ञानत्वेन हेतुत्वमिति भावः तच्चिन्त्यमिति परामर्शत्वेन जन-कताविवक्षयैव उक्तक्रमेण निखिलातिव्याप्तिनिरासः ॥ ३४ ॥

इतरस्य वैयर्थ्यप्रसङ्ग एवमेकावच्छेदेनेत्यपि प्रकृते बाधितं पक्षताजन्यतावच्छेदककोटौ पक्षतावच्छेदकस्य सामानाधि-करण्यस्य तदवच्छेदकावच्छेद्यानुमितिवैलक्षण्यविशेषा विनिवेश्य-नीयाः परामर्शे तु तद्विरह इत्यपि बोध्यम्। व्याप्तिज्ञानत्वेन व्याप्तिज्ञानत्वाप्रवेशायाह तदात्म्यसम्बन्धेनेति न च तादृश-निश्चयत्वावच्छिन्नहेतुत्वविवक्षायां निश्चयत्वस्य ज्ञानत्वघटिततया

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कस्य भागासिद्धिवारणमात्रप्रयोजनत्वादिति वाच्यम् । फलोपहितस्य लक्ष्यतया व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वात् करणत्वनिष्ठव्याप्तेस्तादृशज्ञानत्वत्वाद्यनवच्छेद्यत्वाद्व्यतिरेकिव्याप्तेर्गमकतया वैयर्थ्यशङ्कानवकाशाच्चेति ।

लिङ्गस्यानित्यत्वेऽप्यनुमितिकरणस्य स्वरूपतः प्रत्य-

कथमेतदिति वाच्यम् । तत्र संशयान्यतादृशज्ञानत्वस्य विलक्षणस्यैव निवेशात् इति भावः, अधिकस्येति तादृशजातिमत्करणत्वस्य इत्यर्थः, भागासिद्धीति व्याप्तित्वस्य एकस्य अभावात् विशिष्यव्याप्तिज्ञानत्वमेव हेतुतावच्छेदकं वक्तव्यं तच्च सर्व्वानुमितिकरणाव्रत्तीत्यर्थः, फलोपहितेति व्याप्तिज्ञानत्वस्य स्वरूपयोग्यवृत्तितया फलोपहितेतरभेदव्यभिचारित्वात् तादृशजातिमत्करणत्वविवक्षणे तु फलोपहितकरणत्वविवक्षणान्न व्यभिचारः, तथाच व्यभिचारवारकमेव विशेषणमिति भावः । पक्षसङ्कोचनिबन्धनारुचेराह करणत्वेति तथाच यन्निष्ठा यन्निरूपिता व्याप्तिरित्यादिन्यायेनैव धूमप्रागभाववन्न वैयर्थ्यमिति भावः ।

यद्यपि करणत्वस्यापि स्वरूपयोग्यतावच्छेदकतया तदपि व्याप्तिज्ञानत्वमेव, तथाच क्व यन्निष्ठेत्याद्यवकाशः तथापि तादात्म्येन व्याप्तिज्ञानमपेक्ष्य बोद्धव्यम् । यद्वा करणत्वमतिरिक्तमेव व्यतिरेकीति अनुमानेतरभेदाभावव्यापकतया उक्तहेतुप्रतियोगिकाभावनिष्ठाया ग्राह्यत्वात् । वैयर्थ्येति अखण्डाभावघटकतया न वैयर्थ्यमिति भावः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ अनुमानप्रामाण्यनिरूपणम् ।

तत्त्वचिन्तामणिः ।

अथानुमानं न प्रमाणं योग्योपाधीनां योग्यानुपलब्ध्याभावनिश्चयेऽप्ययोग्योपाधिशङ्कया व्यभिचारसंशयात् शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भा-

---

व्योपजीवकत्वं व्यवस्थापयन्नाह तच्चेति अनुमितेर्ज्ञानाकरणकज्ञानत्वेन प्रत्यक्षमिति मध्यनिवेशे तत्करणस्यापि प्रत्यक्षप्रमाणान्तर्भावः स्यादिति तन्निरस्यति तच्चेत्यपि कश्चित् ॥ ३५ ॥

इति अनुमानदीधितौ अनुमितिनिरूपणं समाप्तम् ।

ननु अनुमानपरीक्षायां तच्चेत्यादिग्रन्थोऽनुपयुक्त इत्यरुचेराह लिङ्गस्येति केचिदित्यस्वरसोद्भावनं तद्बीजन्तु प्रत्यक्षस्य लक्षणान्तरसम्भव इति ज्ञानाकरणकेति । ज्ञानकरणकत्वव्यभिचार्यनुभवत्वव्याप्यजातिमत्त्वमित्यर्थः, तेन श्रवणकरणकात्मसाक्षात्कारसंग्रहः ॥ ३५ ॥

इति दीधितिप्रसारिण्यां अनुमितिनिरूपणं समाप्तम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वनामात्रात् संवादेन च प्रामाण्याभिमानादिति नाप्रत्यक्षं प्रमाणम् ॥ १ ॥

इति न अप्रमाणसाधर्म्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमानत्वात् एतद्वाक्यस्य सन्दिग्धविपर्य्यस्तान्यतरं प्रत्यर्थवत्त्वात् तयोश्च परकीययोरप्रत्यक्षत्वात्, अनुमानमप्रमाणमितिवाक्यस्य प्रामाण्याप्रामाण्ययोर्व्या-

दीधितिः।

अनुमानप्रामाण्यं परीक्षितुं चार्व्वाकमतमुत्थापयति अथेति अनुमानं अनुमानत्वेनाभिमतं धूमादिज्ञानमसत्ख्यात्युपनीतमनुमानमेव वा सम्बादेन सम्बादाभिमानेन सम्भावितस्यासतोऽनुगताकारस्य परमार्थसत्स्वलक्षणमात्रसाक्षिणाध्यक्षेणानुल्लेखात् ॥ १ ॥

प्रमाप्रमासम्भावितस्य सम्भावनाकालीनानुगतविषयत्वेन असत्ख्यातित्वात्। निर्व्विकल्पकस्य सद्विषयतया विषयजन्यतया औचित्यानिकविषयत्वरूपसम्बाद इत्यर्थः। परमार्थसत् वस्तुसत् स्वं असाधारणं देशाननुगमात् परमार्थञ्च कालाननुगमात् क्षणिकस्य अतत्वलक्षणं यस्य इत्यर्थः। अनुगतधर्म्मश्च न निर्व्विकल्पकविषय इत्यर्थः।

अनुल्लेखादिति। तथाच तन्मते प्रमाणद्वयपरिगृहीतेत्यादिरूपसम्बादस्य प्रकृतेः अनवतार इति भावः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घाताच्च। अपिचानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणत्वापत्तेः, प्रामाण्यस्यानुमेयत्वात् स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः। व्याप्तिग्रहोपायश्च वक्ष्यते ॥ २ ॥

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ अनुमानप्रामाण्यनिरूपणं समाप्तम्।

अध्यक्षमूलकविकल्पोल्लिखितत्वाद्वा संवादः अनुमानाप्रामाण्ये च तन्मूलकसमयनिर्णयाद्यधीनप्रवृत्तिकयोः शब्दोपमानयोः सुतरामप्रामाण्यान्नाप्रत्यक्षं प्रमाणमित्याह इति नेत्यादि अप्रमाणसाधर्म्येण प्रमाणताप्रयोजकरूपशून्यत्वेन दृष्टसाधर्म्यस्य साधर्म्य-

---

ननु तन्मते नैतत् सम्वादलक्षणवस्तुनः क्षणिकत्वेन एकनिर्व्विकल्पकविषयस्य निर्व्विकल्पकान्तरविषयत्वात् तदीयसम्वादलक्षणमाह अध्यक्षेति अध्यक्षं निर्व्विकल्पकं यथाश्रुतमूलस्यापि अनुमानमित्याद्युपक्रमान्नाप्रत्यक्षं प्रमाणमित्याद्युपसंहारविरोधादाह अनुमानेति अप्रमानसाधर्म्यस्य अप्रामाण्यसाधने व्यभिचारादाह अप्रमाणेति। ननु अव्यवहितमेवाभिहितं तच्चेत्यादिना, लिङ्गज्ञानमेवानुमानं तत्कुतः साधर्म्यस्यानुमितिकरणत्वमिति ग्रन्थ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दर्शनस्य वा, नन्वभिहितमेव साधर्म्म्यदर्शनं सम्भावनां भावयति सम्भावनैव च बहुशो व्यवहारहेतुरित्यत आह अनुमानमिति।

ननु न वयमापाततो भ्रमजनकत्वलक्षणमप्रामाण्यं निरूपयामो येन भ्रमस्य विषयबाधाधीनतया प्रामाण्यं सम्भाव्येतापि परन्तु प्रमाकरणत्वव्यतिरेकमत आह अपिचेति। स्वत इति न चानुगताकारासंस्पर्शिनि परमार्थसत्स्वलक्षणसाक्षिणि स्वसंवेदनसंविदित-प्रामाण्ये निर्व्विकल्पकज्ञाने न प्रामाण्यं सन्दिह्यते परन्तु तदुत्तरभाविनि समुल्लिखितालोकानुगताकारे सविकल्पक एवेति वाच्यम्। निर्व्विकल्पकस्य सन्मात्रा-वलम्बनत्व--स्वविषयत्वप्रामाण्यावगाहित्वानामनुमाना-धीनसिद्धिकत्वात्। सर्व्वमिदं सति व्याप्तिनिश्चये स्यात् स एव तु न सम्भवत्युपायाभावादित्यत आह व्याप्तीति ॥ २ ॥

इति अनुमानदीधितौ अनुमानप्रामाण्यनिरूपणं समाप्तम्।

क्रान्मतं पूरयति साधर्म्म्यदर्शनस्येति, अभिहितमेव उक्तमेव, साधर्म्म्यदर्शनं प्रमाणताप्रयोजकरूपप्रदर्शनं, भावयति उत्पादयतीत्यर्थः, न प्रामाण्यं सन्दिह्यते इति तथाचान्यत्र सविकल्पके

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ व्याप्तिपञ्चकम् ।

तत्त्वचिन्तामणिः ।

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः न तावदव्यभिचरितत्वं तद्धि न साध्याभाववदवृत्तित्वम् साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम् ॥ १ ॥

दीधितिः ।

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेताववव्याप्तिमाशङ्क्याह साध्यवद्भिन्नेति । साध्यवद्भिन्ने यः साध्याभावस्तद्वदवृत्तित्वमर्थः ॥ १ ॥

प्रामाण्यसंशयात् निर्व्विकल्पके स्वतः प्रामाण्यग्रहो न विरुद्ध इति भावः । सन्मात्रेत्यादिकन्त्वापाततः, तन्मते सन्मात्रावलम्बनत्वादिव्यवहारस्तु सम्भावनयैव भविष्यतीति ॥ २ ॥

इति दीधितिप्रसारिण्यां अनुमानप्रामाण्यनिरूपणं समाप्तम् ।

साध्यवद्भिन्नावृत्तित्वमित्यस्यैव सम्यक्त्वे साध्याभावपदवैयर्थ्यमिति सार्व्वभौमदूषणमुद्धर्त्तुमाह साध्यवद्भिन्ने य इति तथाच साध्यवद्भिन्नो गुणः तद्वृत्तिसाध्याभावविशेषलाभार्थं साध्यवद्भिन्न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यवत्प्रतियोगिकान्योन्याभावा-सामानाधिकरण्यम् ॥ २ ॥

सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् ॥ ३ ॥

कर्म्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह साध्यवदिति ॥ २ ॥

इति तच्चाभावे अन्वितं न साध्याभाववदित्यन्तेन, तथाच न वैयर्थ्यगन्धोऽपि ।

न च घटत्वघटपटसंयोगान्यतराभाववान् पटत्वादित्यत्राव्याप्तिः साध्यवद्भिन्नघटनिष्ठसंयोगरूपसाध्याभाववति पटे पटत्वस्य वृत्तित्वादिति वाच्यम् । तत्र साध्याभावस्यातिरिक्तस्यैवाभ्युपगमादेकमात्रप्रतियोगिकाभावाभावस्यैव भावरूपत्वात् । केचित्तु साध्यवद्भिन्नस्या भेदेन सम्बन्धेन साध्याभाववति विशेषणात् कर्म्मधारयपक्षेऽपि न दोष इत्याहुः(१) ॥१॥

कर्म्मादाविति । न च साध्यवद्भिन्नवृत्तित्वविशिष्टो यः साध्याभावः तद्वदवृत्तित्वमित्युक्तौ नाव्याप्तिरिति वाच्यम् । साध्याभावांशवैयर्थ्यात् साध्यवद्भिन्नवृत्तित्वविशिष्टवत्किञ्चिदधिकरणवृत्तित्वाभावोक्तावेव सामञ्जस्यात् ॥ २ ॥

---

(१) यथासन्निवेशे वैयर्थ्याभावात् अत्र साध्याभाववत एव वृत्तित्वांशे निवेशेन तत्र साध्यवद्भिन्नस्य विशेषणत्वे ईदृशवृत्तित्वघटितलक्षणस्य लक्षणान्तरत्वेन न दोषः इति भावः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतोः साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह सकलेति साकल्यं साध्याभाववति साध्ये च बोध्यं साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यस्तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः। अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणायाभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यम् ॥

सिद्धिकर्मत्वं साध्यत्वमिति यथाश्रुतार्थपक्षीयसाध्यस्यैवेत्यभिप्रेत्य साध्यवत्पक्षेत्युक्तम् (१)।

अत्र धूमवान् वह्नेरित्यत्र साध्याभाववज्जलनिष्ठाभावप्रतियोगिन्यतिप्रसक्तिवारणाय साकल्यमिति साध्याभाववतीति साध्ये चेति साध्याभावे साकल्यदाने तत्तद्रूदावृत्तित्वादिरूपेण यो वह्न्यभावस्तस्यापि सकलसाध्याभावमध्ये सन्निवेशात् तावतामधिकरणस्याप्रसिद्धेः, ननु साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविवक्षाया आवश्यकत्वात्प्रकृते च संयोगसम्बन्धावच्छिन्नप्रतियोगिताकयावदभावाधिकरणस्य जात्यादेरेव प्रसिद्धत्वादिति चेन्न धूमवान् वह्नेरित्यादौ सत्वादिना साध्याभाववति जात्यादौ

---

(१) सिद्धिरनुमितिः तद्विषयत्वं न दृष्टान्तस्य साध्यस्य तत्र पक्षता विरहादिति साध्यवत् पदेनैव साध्यवत्पक्षो लभ्यते इति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेत्वभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः तत्प्रतियोगित्वञ्च हेतुतावच्छेदकरूपेण बोध्यं, तेन द्रव्यत्वादौ साध्ये विशिष्टसत्त्वादौ नाव्याप्तिः न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्तादावतिप्रसङ्गः॥

वह्न्यादेरभावादतिव्याप्तिः, घटत्वाभावादेः साध्यतायां सकलसाध्याभावान्तःपातित्वाद्घटावृत्तित्वावच्छिन्नाभावानामधिकरणाप्रसिद्ध्याव्याप्त्यापत्तेः साध्ये चेति चकारोऽनास्थायां अतएवाह साध्याभावो वेति। यद्वा सत्तावान् जातेरित्यत्र गुणकर्म्मान्यताविशिष्टसत्ताभाववति गुणादौ जातेरवृत्तेरभावादव्याप्तेराह साध्याभावो वेति विपत्तैकदेशो यः कश्चन साध्याभाववान् तन्निष्ठाभावप्रतियोगित्वादित्यर्थः। व्यभिचारिणि चेति रूपवत्संयोगादित्यादावित्यर्थः॥

हेत्वभावोऽपीत्यपिना साध्याभावसमुच्चयः। क्रमेण व्यावृत्तिमाह तेनेत्यादि तादृशेति प्रतियोगितावच्छेदकावच्छिन्नव्यधिकरणेत्यर्थः साध्याभावस्य तथात्वोपादानाच्च गुणकर्म्मान्यत्वविशिष्टसत्तावज्जातिमत्त्वादित्यादौ। प्रतियोगिव्यधिकरणसाध्याभाववज्जात्यादिनिष्ठाभावप्रतियोगिनि जातिमत्त्वे नातिव्याप्तिः। न च तत्साध्याभावस्य गुणादौ प्रतियोगिसमानाधिकरणत्वात्प्रतियोगिव्यधिकरणसाध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्धेः, कुतोऽति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात् ॥४॥

इति श्रीमद्गङ्गेशोपाध्याये विरचितं तत्त्वचिन्तामणौ व्याप्तिपञ्चकं समाप्तम्।

यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादत आह साध्यवदिति ॥ ३ ॥

व्याप्तिरिति वाच्यम्। संयोगिएतत्वादित्यनुरोधेन वक्ष्यमानरीत्या अधिकरणविशेषनियन्त्रितस्य तस्य वक्तव्यत्वादिति। संयोगाभाववान् विभागादित्यत्राप्यव्याप्तिर्बोध्या। साध्ये साकल्याप्रसिद्धेः सकलसाध्याभावाप्रसिद्धेश्चेति क्रमेणाव्याप्तित्रयमाह यत्रेत्यादिना, साध्याभावस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वविवक्षणादाह विपक्षो वेति ॥

इदमीश्वरभिन्नं तद्भिन्नत्वप्रकारकप्रमाविषयत्वादित्यादौ। ननु साकल्यमिहाशेषरूपं वक्तव्यमित्यत आह निर्धूमत्वेति, निर्धूमत्वस्य धूमत्वावच्छिन्नसामान्याभावस्य एकव्यक्तिमध्य एव गतत्वादाह तस्य चेति तेन यत्किञ्चित्साध्यवतोऽन्यस्मिन् साध्यवद्व्यक्त्यन्तरे वृत्तिमति धूमादौ नाव्याप्तिरिति। अव्याप्येति। सद्धेतुत्वार्थमाह तत्त्वेनेति व्याप्यत्वेनेत्यर्थः ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्य चान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम् नहि भवति नीलो घटो घटादन्य इति ॥ ४ ॥

इति अनुमानदीधितौ व्याप्तिपञ्चकं समाप्तम् ।

व्युत्पत्तीति यच्छब्दसमभिव्याहृतमन्यपदादिकं प्रयुज्यते तदर्थोन्वयी तदवच्छेदकं अन्वयितावच्छेदकं तदवच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यमित्यर्थः । तदेव व्यतिरेकेण साधयति नहीति । ननु घटत्वस्यावच्छेदकत्वं कस्य संसर्गः, न तावत् घटत्वघटयोः, तयोः परस्परमनन्वयादेव । न तावत् घटत्वाभावयोः घटत्वस्य पदार्थैकदेशतया आकाङ्क्षाविरहादिति चेन्न । घटाभावयोरेव घटत्वावच्छिन्नप्रतियोगितायाः संसर्गत्वात् । घटत्वस्य घटांशे प्रकारत्वेऽपि संसर्गतया भानमविरुद्धम् । घटाभाववद्भूतलमित्यत्र घटाभावस्यैव घटत्वावच्छिन्नप्रतियोगितायाश्च घटत्वमवच्छेदकत्वं प्रतियोगितेत्येतत् त्रितयात्मिकायाः सम्बन्धत्वात् । नीलस्फटिक इत्यत्र नीलसमवायिनीलसंयोगस्यैव घटत्वावच्छिन्नप्रतियोगिता अखण्डा इत्यपि कश्चित् प्रमेयं नास्तीति प्रतीत्यनापत्तेः विशेषणताविशेषेण प्रमेयत्वघटत्वोभयानवच्छिन्नप्रतियोगित्वाऽप्रसिद्धेः, नवीनास्तु यावन्तो विशेषणताविशेषेण अभावास्तावन्निरूपिता एकैव प्रतियोगितायावन्तश्च प्रमेयत्वेन अभावास्तावत् स्वेकैवप्रतियोगिता प्रमेयं नास्तीत्यत्रोभयावच्छिन्न-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ सिंहव्याघ्रलक्षणम् ।

तत्त्वचिन्तामणिः ।

नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैयधिकरण्यानधिकरणत्वं वा तदुभयमपि साध्यानधिकरणानधिकरणत्वं तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चासिद्धम् ॥ १ ॥

दीधितिः ।

नापीति साध्यमसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वम् साध्यनिष्ठासामानाधि-

---

प्रतियोगितासम्बन्धेन प्रमेयत्वविशिष्टबोध (१) इति नानुपपत्तिरित्याहुः ॥ ४ ॥

इति अनुमानदीधितिप्रसारिण्यां व्याप्तिपञ्चकं समाप्तम् ।

प्रकृतलक्षणयोः पौनरुक्तिः शङ्कयान्यथा व्याचष्टे साध्यमिति । तथा चात्र बहुव्रीहिरुत्तरत्र तत्पुरुष इत्यभिप्रायः, यत्तदर्थयोरननुगमादाह साध्यनिष्ठेति प्रतियोगित्वं निरूपकत्वं ननु द्रव्यं सत्त्वादित्यादावतिव्याप्तिः सत्वस्य द्रव्यत्वसामानाधिकरण्याभाववत्त्वाभावात् सत्वे द्रव्यत्वनिष्ठासामानाधिकरण्यनिरू-

---

(१) प्रमेयत्वघटत्वोभयावच्छिन्नप्रतियोगिताया एव प्रमेयत्वेनावच्छेदत्वमात्रं विषयोकृत्यसंसर्गतया भानेन प्रमे नायंस्तीति भ्रमात्मकप्रतीत्युपपत्तिरिति भावः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करण्यप्रतियोगित्वम् साध्यनिष्ठाधेयत्वानिरूपकाधिकरणावृत्तित्वमिति यावत् तदनधिकरणत्वमित्यर्थः साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसङ्गः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षस्तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः ॥

पकत्वाभावादतः साध्यनिष्ठेति केचित् वस्तुतो बहुव्रीह्यर्थघटितस्य गुरुत्वादाह साध्यनिष्ठेति । ननु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणावृत्तित्वं हेतुतावच्छेदकसम्बन्धेनैव वक्तव्यम् । अन्यथा वह्निमान् धूमादित्यत्र तादृशस्वावयवे धूमस्य वृत्तेरव्याप्तिः । तथाच सत्तावान् द्रव्यत्वादित्यत्र सत्तानिष्ठाधेयत्वानिरूपकाधिकरणसामान्यादिसमवेतत्वस्य अप्रसिद्ध्याऽव्याप्तिस्ततो निष्कर्षं कुरुते साध्यनिष्ठेति । अत्राधेयत्वमपि साध्यतावच्छेदकसम्बन्धेनैव तेन वह्नेः समवायेन साध्यत्वे धूमे हेतौ सम्बन्धसामान्येन साध्यनिष्ठाधेयत्वा-निरूपकाधिकरण-जलह्रदादिनिष्ठाभावप्रतियोग्यधिकरणताके वह्नौ अतिव्याप्तिरित्यतो व्यापकेति । यत्किञ्चिदधिकरणतामादाय महानसीयवह्न्यधिकरणतात्वावच्छिन्नाभावस्य तादृशाधिकरणत्वव्यापकत्वात्, व्यभिचारिण्यतिव्याप्तिरित्यत आह सामान्येति, तेनेति तथाच सत्तावान् द्रव्यत्वादित्यत्र सत्तानिष्ठा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वञ्चर-माधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहायद्वय-मेकोक्त्या अनूद्यदूषयति तदुभयमपीति ॥ १ ॥

साध्येत्यादिः साध्यं यदधिकरणानधिकरणं तत्त्वा-भावः। साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावस्त्वार्थः। तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधि-करणाप्रसिद्ध्या नानाव्यक्तिसाध्यके च एकसाध्य-व्यक्तिनिष्ठाधेयत्वानिरूपकाधिकरणत्वं साधनाधिकरण-व्यक्त्यन्तरस्येत्यव्याप्तिः, क्वचिद्व्यभिचारिण्यतिप्रसङ्गश्चाद्ये द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्न-

---

धेयत्वानिरूपकाधिकरणे समवेतत्वाप्रसिद्धावपि सामान्यादौ द्रव्यत्वाधिकरणत्वाभावात् नाव्याप्तिः साध्यासामानाधिकरण्यादिः साध्यानधिकरणानधिकरणत्वे पर्य्यवसानमभिप्रेत्याह अनति-प्रयोजनकतयेति अभावभेदात् यथोक्तसन्निवेशाच्चावैयर्थ्येऽपि प्रयो-जनराहित्यमित्यर्थः ॥ १ ॥

साध्यमिति प्रथमलक्षणाभिप्रायेन साध्यस्येति, द्वितीयलक्ष-णाभिप्रायेण अप्रसिद्धेति आधेयत्वनिरूपकत्वसामान्याभावमभि-प्रेत्य नानेति, यत्किञ्चिदभावमभिप्रेत्यसामान्याभावपक्षे दोषा-न्तरमाह क्वचिदिति। गुणकर्म्मान्यत्वे सति सत्तावान् जाते-रित्यत्र, अत्र च सत्तानिष्ठं यावदाधेयत्वं तदनिरूपकं सामान्याद्ये-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगिताकोभेदो विवक्षितस्तदा केवलान्वयिनि यदि च यत्किञ्चित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके सर्व्वत्राव्याप्तिः ॥

केचित्तु साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवद्वृत्तित्वाभावस्तदधिकरणभिन्नत्वमर्थस्तेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनावृत्तावपि न क्षतिः । तादृशाभावस्य सम्बन्धान्तरेण तत्रैव वर्त्तमाने सुलभः व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरण एव तादृशि तादृशाभाववत्त्वं सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात् । न चैवं गुणकर्म्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः, विशिष्टस्यातिरिक्तत्वात् अनतिरिक्तत्वे

वेति धूमवान् वह्नेरित्यत्र त्वयोगोलकस्य तादृशत्वान्नातिव्याप्तिः । आद्यप्रतीकस्य व्यावृत्तिमाह, तेनेति । द्वितीयस्य तदाह, वह्निमतीति । तेनैवेति हेतुतावच्छेदकसम्बन्धेनैव एतच्च अभावान्वयीति बोध्यम् । न क्षतिरिति, वह्निमान् धूमात् इत्यत्र नाव्याप्तिरित्यर्थः । तादृशाभाव इति न च गगणे एव प्रसिद्धिः, गगने तादृशहेत्वधिकरणावच्छिन्नसाध्यवद्वृत्तित्वाभावविरहात्, तादृशीति हेतुतावच्छेदकसम्बन्धेन हेतुमतीत्यर्थः । ननु तादृश-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तु विशेषणविशेष्यसम्बन्धस्यैव परम्परया व्याप्तत्वात्, केवलान्वयिनि चाव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुस्तच्चिन्त्यं सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमितिप्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन सामानाधिकरण्यस्य वा अभावं गुणेऽवगाहते न तु सत्तायामेव द्रव्यवृत्तित्वाभावं सत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादिसर्व्वजनसिद्धप्रतीतिबाधितत्वात् बाधकाभावात्तु संयोगतदभावयोरवच्छेदकभेदेनैकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः। अती-

---

प्रतीत्या सामानाधिकरण्यस्य प्रतियोगित्वमवगाह्यते तत्कुतोऽवच्छेदकस्य प्रतियोगित्वावगाहनेन निर्व्वाह इत्यत आह, परम्परासम्बन्धेनेति। ननु द्रव्यवृत्तित्वस्य अव्याप्यवृत्तित्ववादिनो मते द्रव्यवृत्तित्वाभावोप्यव्याप्यवृत्तिस्तत् कुतो विरोध इत्यत आह, द्रव्यवृत्तित्वाभाव इति। ननु मूले कपिसंयोगो नास्तीति प्रतीतेर्म्मूले संयोगावच्छेदकत्वाभावादिविषयत्वेनोपपत्तौ कपिसंयोगाभावोऽपि वृक्षे न सिध्येत् इत्यत आह, बाधकाभावाच्चेति। संयोगाभावो न वृक्षवृत्तिरितिप्रत्ययाभावादित्यर्थः। ननु अत्रापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न्द्रियसाध्यकेऽतीन्द्रिये व्यभिचारित्वातिप्रसङ्गाच्च । तत्र सामानाधिकरण्याभावस्य प्रत्यक्षत्वासम्भवेनासिद्धेः ॥ २

न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयं तद्वद्वृत्ति-भिन्नत्वस्योपाधित्वात् । किञ्च इदमिदानीमितिप्रतीति-नियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः तेन सम्बन्धेनाधिकरणे काले तेन सम्बन्धेन साध्य-वद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः ॥ ३ ॥

इति अनुमानदीधितौ सिंहव्याघ्रलक्षणं
समाप्तम् ।

द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रतीतिरसिद्धेत्यत आह, अतीन्द्रियेति । इदं गुरु आकाशाभावादित्यत्रेत्यर्थः ॥ २ ॥

ननु आकाशाभावो गुरुत्ववद्वृत्तित्वाभाववान् गुरुत्वाभाव-वद्वृत्तित्वात् इत्यनुमानात् सेत्स्यति इत्याशङ्क्य निषेधति, न चेति । तद्वद्वृत्तिभिन्नत्वस्येति अस्य उपाधेः तेजस्त्वादौ साध्यव्यापकता साधनाव्यापकता च पक्षादौ इति न चैवंविधतर्कावतारे अतीन्द्रियसंयोगस्यापि अव्याप्यवृत्तित्वं न स्यात् इत्यत आह, किञ्चेति । न च स्वनिष्ठताद्दृशसामानाधिकरण्याभावानवच्छेदक-हेतुतावच्छेदकसम्बन्धीयहेत्वधिकरणीयत्वविवक्षयैव एतदुद्धार इति वाच्यम् । विकल्पासहत्वात् तथाहि स्वनिष्ठं यत्सामानाधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करण्यं तदभावस्य अनवच्छेदकत्वं हेत्वधिकरणस्येत्युक्तौ वह्निमान् धूमादित्यत्राव्याप्तिः धूमवन्निष्ठं यत्सामानाधिकरण्यं तदभावस्यैव पर्व्वतरूपादिनिष्टस्य हेतुतावच्छेदकसम्बन्धीयहेत्वधिकरणपर्व्वतादेरवच्छेदकत्वात् ।

अथ स्वनिष्ठो यः सामानाधिकरण्याभाव इति वाच्यम् । कालो घटवान् पटात् इत्यत्र तु पटस्यावयव एव तथा भावः प्रसिद्धः कालस्तत्रानवच्छेदक एवेति वाच्यम् । प्रमेयवान् अभिधेयात् इत्यत्र स्वरूपसम्बन्धेन हेतुतायां गगनपरिमाणादेर्हेतोर्यः स्वनिष्ठ-साध्यवद्वृत्तित्वाभावः तदवच्छेदकमेवाकाशादिकं तत्सम्बन्धाव-च्छिन्नहेत्वन्तराधिकरणमित्यव्याप्तेः, अथ यद्व्यक्तिनिष्ठस्तादृश-वृत्तित्वाभावस्तदधिकरणस्य अनवच्छेदकत्वं वक्तव्यं तदेदं पार्थिव-परमाणुत्वाभाववत्, परमाणुत्वाभावादित्यत्र परमाणुत्वाभावस्य हेतुतावच्छेदकसम्बन्धान्येन सम्बन्धेन अधिकरणेषु कालादिष्वपि विशिषणताविशेषेण वृत्तेस्तादृशवृत्तित्वाभावो हेतावप्रसिद्ध एव इत्यलं तदेकदेशप्रतिकारेण इति ॥ ३ ॥

इति अनुमानदीधितिप्रसारिण्यां सिंहव्याघ्रलक्षणं समाप्तम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ व्यधिकरणधर्म्मावच्छिन्नाभाववादिलक्षणम् ।

तत्त्वचिन्तामणिः ।

अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात् । न चैवं घट एव व्यभिचारः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः न च वाच्यत्वाभावस्तादृशो घट इति चेत्तर्हि तादृशसाध्याभावसामानाधिकरण्याभावोव्याप्तिः तथाचाप्रसिद्धिः ।

दीधितिः ।

समवायितयेति वाच्यत्वं न यथा समवायि तथा वक्ष्यते, घटादिसमवायितयेत्यर्थः इत्यप्याहुः प्रमेय-

---

प्रसारिणी ।

समवायितयेति । ननु समवायित्वं वाच्यत्वनिष्ठप्रतियोगिताया व्यधिकरणमेव न भवति । तथाहि वाच्यत्वं तावदीश्वरेच्छा तत्र इच्छात्वादीनां समवायात्, इच्छानिरूपितसमवायप्रतियोगित्वाच्च इति द्विविधस्य समवायित्वस्य तत्र भाव इत्यत आह, वाच्यत्वमिति वक्ष्यत इति । वाच्यत्वं नेश्वरेच्छामात्रं, तथात्वे घटशब्दस्य सम्बन्धो वाच्यो रूपनिरूपितसमवाय इव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यके च भावत्वेनाभावानां अभावत्वेन भावानां वह्नित्वेन निर्वह्नौ अवृत्तिमात्रवृत्तिगगनत्वादिना विरुद्धघटत्वपटत्वाभ्याञ्च सर्व्वत्र प्रमेयमात्रस्याभावः सुलभः ॥ १ ॥

ननु पारिभाषिकमेवाऽव्यभिचारित्वं तथाहि यत् समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकता-

---

रूपस्य इति चेन्न, तर्हि विशिष्टस्य न समवायित्वं न वा समवेतत्वमपि, वस्तुत एव तन्मते शक्तिरतिरिक्तैव इति घटशब्दस्यापि पटे शक्ततापत्तेः। अथ घटशब्दोपहितेश्वरेच्छा इति स्वयमेव प्रतिपादितमिति स्वयं शक्तिं प्रदर्शयन् प्रमेयसाध्यके व्यधिकरणधर्म्मावच्छिन्नाभावं व्यवस्थापयति, प्रमेयसाध्यक इति लक्षणयोर्गमनन्तु ईदृशाभावानवतारेऽपि घटत्वेन वाच्यत्वाभावमादाय प्रथमस्य ज्ञेयत्वेन वाच्यत्वाभावमादाय द्वितीयस्य सम्भव इति। ननु प्रमेयमात्रस्य एकोऽभावस्तथापि नायात इत्यत आह, वह्नित्वेनेति। ननु केवलान्वयिप्रमेयमात्रस्याभावो मृग्यत इत्यत आह, गगनत्वेनेति। ननु गगनत्वेनप्रमेयं नास्तीत्यत्र गगनत्वविशिष्टप्रमेयाभाव एव विषयो वक्तव्य इत्यत आह, विरुद्धेति ॥ १ ॥

यदित्यादि अत्र यत्पदं हेत्वभिमतपरं साध्यपरत्वे परिमाणवान् आकाशत्वात् इत्यत्र आकाशपरिमाणत्वेन परिमाणाभावस्य तादृशस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्धाऽव्याप्त्यापत्तेः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्व सर्व्वत्र वाच्यत्वाद्यभावस्य तथात्वाद्यावत्त्वोपादानम् । अतएव भूतत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोन्यत्वाद्यभावस्यातथात्वान्नातिप्रसङ्गः ॥

साधनसमानाधिकरणस्य गोत्वाद्यभावस्य तत्तत्साध्य-

एतत्पदादाने वह्निमान् धूमात् इत्यादौ वह्नित्वावच्छिन्नप्रतियोगिकवह्न्यभावस्य प्रतियोगिसामानाधिकरण्याभावात् दोष इति, यद्यपि तदभावस्य कालिकसम्बन्धेन वह्निमद्वृत्तित्वात् न दोषः, तथापि अयमात्माज्ञानादित्यादावव्याप्तिर्बोध्येति । साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठा या व्याप्यता, तन्निरूपिका या व्यापकता, तदवच्छेदिका या प्रतियोगिता, यत्र यत्र साध्यतावच्छेदकावच्छिन्नं साध्यं, तत्र तत्र वर्त्तमानवृत्तिर्वा या प्रतियोगिता, तादृशप्रतियोगिताकाभावा इत्यर्थः, सर्व्वत्र व्यभिचारिण्यतिव्याप्तेरिति शेषः । तथात्वात् प्रतियोगिसमानाधिकरणत्वात् । अतएव तादृशाभावस्य यावत्त्वविवक्षणादेव, साभिप्रायं तादृशाभावस्य यावत्वे विवक्षिते उदासीनमनोन्यत्वाद्यभावमादायापि नातिव्याप्तिरिति कैमुतिकन्यायेनाह, मनोन्यत्वेति ॥

ननु यत्समानाधिकरणा यावन्तोऽभावाः प्रतियोगिसमानाधिकरणा इत्येवास्तु अलं साध्यतावच्छेदकेत्यादिविवक्षणे-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यक्त्यभावस्य चातथात्वात् साध्यतावच्छेदकेत्यादि। येन सम्बन्धेन हेतुस्तेनैव तदधिकरणं बोध्यम् ॥ २ ॥

तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतया अधिकरणे घटादौ वर्त्तमानस्य साध्याभावस्यातथात्वेऽपि

नेत्यत आह, साधनसमानाधिकरणस्येति। ननु गोत्वाद्यभावस्य साध्याभाव इत्यनेनैव वारणात् आह, तत्तदिति। ननु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभावा यावत्वेन विशिष्यन्तां किं अवच्छेदकावच्छिन्नाभ्यां, व्यापकत्वन्तु तद्वन्निष्ठप्रतियोगिव्यधिकरणात्यन्ताभावाप्रतियोगित्वं, प्रतियोगिता च न तदवच्छेदकधर्म्मः, अपि तु अतिरिक्तैव इत्यत आह, अतएवेति। निरुक्ताभावस्य यावत्वविवक्षणादिवेति नव्याः। अतथात्वात् प्रतियोग्यसमानाधिकरणत्वात्। साध्यव्यापकप्रतियोगिका इत्युक्तेऽपि तत्रैव दोष इत्यवच्छेदकानुसरणं साध्यतावच्छेदकावच्छिन्नव्यापकप्रतियोगिकाभावा इत्यत्रापि तदभावमादायैव दोषः तद्वह्नेरपि वह्नित्वावच्छिन्नं प्रति प्रमेयत्वेन व्यापकत्वात्। एवं साध्यतावच्छेदकव्यापकप्रतियोगिताका इत्यत्रापि तद्वह्निनिष्ठप्रतियोगिताया अपि प्रमेयत्वेन वह्नित्वव्यापकत्वात्। न च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताका यावदभावा इत्येवोच्यतां, प्रमेयसाध्यकाव्याप्तेरित्यादि स्वयमूहनीयम् ॥ २ ॥

तेनेति वह्निमान् धूमादित्यत्र धूमावयववृत्तिसंयोगसम्बन्धावच्छिन्नवह्न्यभावमादायापि यद्यपि व्यावृत्तिर्युज्यते। एव, तथापि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न क्षतिः। एवं दलान्तरेऽपि सम्बन्धभेदनिबन्धनो दोषः सम्बन्धैक्यविवक्षया निरसनीयः॥ ३॥

तदभावस्य उत्पत्तिकाले वह्निमति, एवं द्रव्याव्याप्यवृत्तित्व-वादिमते अवच्छेदकभेदेनापि सत्त्वात्, प्रतियोगिसामानाधि-करण्यसम्भव इति, न च तथापि हेत्वधिकरणावच्छेदेन प्रति-योगिसामानाधिकरण्यविवक्षणेनैव प्रकृतनिर्व्वाह इति वाच्यम्। तादृशविशेषणानुसन्धानेऽपि साध्याभावमादायापि व्यावृत्तिरत्र इत्यभिप्रायात्। अतएव वह्निमत्वप्रकारकप्रमाविषयत्वाभाव-मादाय प्रयोजनमपि अनादेयं, साध्यनिष्ठव्याप्यता च साध्यताव-च्छेदकसम्बन्धेन बोध्या। तेन समवायसम्बन्धेन वह्निसाध्यके व्यभिचारिणि हेतौ साध्यनिष्ठसम्बन्धसामान्यव्याप्यता निरूपित-व्यापकतावच्छेदकप्रतियोगिताकस्य हेतुसमानाधिकरणस्य व्यधि-करणधर्म्मावच्छिन्नस्यैव अभावस्य प्रतियोगिसामानाधिकरण्येन दोषः। तथाविधवह्न्यवयवत्वाभावादौ प्रतियोगिसामानाधि-करण्याभावात्। ननु ज्ञानवान् द्रव्यत्वात् इत्यत्रातिव्याप्तिः, समवायसम्बन्धावच्छिन्नज्ञानाभावस्य विषयतया प्रतियोगिसमा-नाधिकरणत्वात्। अथ आत्मत्वसुखाद्यभावानां तादृशप्रतियोगि-सामानाधिकरण्यविरहात् नातिव्याप्तिरिति चेत्, न तथापि काले हेत्वधिकरणे सर्व्वेषामेव तादृशाभावानां प्रतियोगिसामा-नाधिकरण्यात्। अथ वक्ष्यमाणहेत्वधिकरणावच्छेदेनेत्यनेनैव तद्वारणं इति चेन्न, तथापि ज्ञानवान् आत्ममहाकालान्यतर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वात् इत्यादावतिव्याप्तिरित्यत आह, एवमिति सम्बन्धैक्येति, अत्र व्यापकताघटकसम्बन्धेन प्रतियोगिसामानाधिकरण्यं विवक्षणीय-मिति व्यापकताघटकसम्बन्धसामानाधिकरण्यघटकसम्बन्धयोरैक्य-विवक्षयेत्यर्थः। तेन समवायावच्छिन्नव्यापकतावच्छेदकप्रति-योगिताकसुखाद्यभावस्य समवायेन सुखाद्यसमानाधिकरणत्वान्न दोष इति। अत्र केचित् व्यापकताघटकसम्बन्धप्रतियोगिसामा-नाधिकरण्यघटकसम्बन्धयोरैक्यविवक्षणेन किं, येन येन सम्बन्धेन यस्याभावस्तेन तेन सम्बन्धेन तदधिकरणवृत्तित्वं तदभावस्य इति विवक्षयैवातिव्याप्तेर्वारणात्। तथाहि ज्ञानवान् आत्ममहाका-लान्यतरत्वादित्यत्र समवायसम्बन्धावच्छिन्नज्ञानाभावस्य कालिक-सम्बन्धावच्छिन्नज्ञानाभावस्य च प्रतियोग्यधिकरणे महाकाले वृत्तित्वेऽपि न क्षतिरिति। तन्न कालो घटवान् पटादित्यत्राव्याप्तेः, दैशिकविशेषणतासम्बन्धेन संयोगसम्बन्धावच्छिन्नघटरूपप्रतियोग्य-नधिकरणे महाकाले वृत्तित्वात्, न च साध्यताघटकसम्बन्धेन व्यापकत्वं, प्रतियोगितावच्छेदकसम्बन्धस्य प्रवेशात्, ननु इय-मिच्छा, ईश्वरस्य ज्ञानं सविषयकत्वादित्यत्र व्यभिचाराधिकरणी-भूतेच्छाकृत्योर्वर्त्तमानानां तादृशाभावानां व्यापकताघटकविष-यितासम्बन्धेन सर्व्वेषामेव प्रतियोगिसमानाधिकरणत्वादति-व्याप्तिरिति चेन्न, यावन्तो व्यापकताघटकसम्बन्धास्तैस्तैः प्रति-योगिसमानाधिकरणत्वस्य विवक्षितत्वात्, तथाचेश्वरज्ञानत्वा-भावस्य इच्छान्यत्वाभावस्य वा तादृशव्यापकताघटकसमवायेन स्वरूपेण वा सम्बन्धेन प्रतियोगिसामानाधिकरण्याभावान्नाति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपादिसामान्याभावे साध्ये पृथिवीत्वादिकं सद्धेतु-रेव प्रलये परमाणावुत्पत्तिकाले चावयविनि तत्सत्त्वात् ।

व्याप्तिरिति। न चाभावांशे सम्बन्धविवक्षाया अभावादिति, विषयितासम्बन्धेन तत्रापि तादृशाभावोऽस्तीति वाच्यं, येन येन सम्बन्धेन निरुक्ताभावानां हेतुमति वृत्तिस्तेन तेन स्वविशिष्ट-हेत्वधिकरणावच्छेदेन तैस्तैर्व्यापकताघटकसम्बद्धैः प्रतियोग्यधि-करणवृत्तित्वस्य विवक्षणीयत्वात्, तथाच ईश्वरज्ञानत्वाभावस्य विशेषणताविशेषसम्बन्धेनेच्छावृत्तेः तेन सम्बन्धेन प्रतियोगि-सामानाधिकरण्याभावान्नातिव्याप्तिः। केचित्तु व्यापकताघटक-सम्बन्धप्रतियोगिसामानाधिकरण्यघटकसम्बन्धयोः साध्यतावच्छे-दकसम्बन्धेनैक्यं वर्णयन्ति तन्न सर्वत्र वाच्यत्वाद्यभावस्येति ग्रन्थ-विरोधात्, यत्र महाकालान्यत्वविशिष्टो घटः कालिकसम्बन्धेन साध्यः कालत्वादिति हेतुः तत्र व्यभिचारनिरूपकाधिकरणे महाकाले कालिकसम्बन्धेन तावदभावानां प्रतियोगिसामा-नाधिकरण्यसत्त्वात् अतिव्याप्तिश्चेति, अस्मन्मते तु खण्डकाल-त्वत्वावच्छिन्नाभावस्य तथाविधस्य व्यापकताघटकदैशिकविशे-षणताविशेषेण प्रतियोगिसामानाधिकरण्याभावादतिव्याप्त्यनव-काशात् इति दिक् ॥ ३ ॥

ननु प्राचां मते रूपसामान्याभावस्य साध्यतायां पृथिवीत्वं विरुद्धं तच्च युक्तिविरुद्धम्, आद्यक्षणे रूपं नास्तीतिप्रतीतिसिद्धस्य रूपसामान्याभावस्य तत्राभ्युपगन्तुमुचितत्वात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न च प्रतियोगिवत् तद्ध्वंसप्रागभावयोरत्यन्ताभाव-विरोधित्वं मानाभावात् ॥ ४ ॥

तत् कीदृशो व्यवहार इत्यत आह रूपेति । केचित्तु प्राचां मते तत्रालक्ष्ये तन्मते एव तत्रातिव्याप्तिः, तथाहि रूपसामान्याभावस्याभावो रूपं, तच्च रूपध्वंसप्रागभावयोरप्यभावः जन्यभावस्य स्वध्वंसप्रागभावात्यन्ताभावाभावत्वाभ्युपगमात्, तथाच रूपस्वरूपाभावस्य स्वध्वंसादिसमानाधिकरणत्वात् इत्यत आह रूपेतीत्याहुः तन्न, तन्मते पृथिव्यन्यत्वाभावस्यापि तादृशत्वात् तस्य च प्रतियोगिसामानाधिकरण्याभावात्, न च तत्रापि घटवृत्तित्वविशिष्टपृथिव्यन्यत्वाभावस्य प्रतियोगी योऽभावः तत्प्रतियोगी पटे वर्त्तते पृथिव्यन्यत्वाभावोऽपि तत्र वर्त्तत इति सामानाधिकरण्यमिति वाच्यम्, तथापि पृथिव्यन्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्य तथात्वात्, न च तस्यापि उक्तप्रकारेण तथात्वं तथापि पृथिव्यन्यत्वप्रकारकप्रमाविशेष्यत्वाभावस्य अतथात्वात्, न च तथाप्युक्ततादृशप्रमाविशेष्यत्वस्य विशेषणताविशेषरूपव्यापकताघटकसम्बन्धेन प्रतियोगिसामानाधिकरण्याभावात् । किञ्च एवं धूमवान् वह्नेरित्यत्रापि किञ्चिदधिकरणवृत्तित्वविशिष्टस्याभावरूपप्रतियोगिना धूमाभावस्य समानाधिकरणत्वात् अतिव्याप्तेः दुरुद्धरत्वादिति, प्रलये महाप्रलये, परमाणौ पार्थिवपरमाणौ, तत्सत्त्वात् रूपसामान्याभावसत्त्वात् । मानाभावादिति न च रूपात्यन्ताभावस्य रूपादित्रितयाभावात्मकत्वं व्याहतम् इष्टत्वात्, ननु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतएवान्तराश्यामे रक्तं रूपं नास्तीति प्रत्ययः । न चैष रक्तिमरूपध्वंसाद्यवगाही पूर्व्वापररक्तिमध्वंस-प्रागभाववति इदानीं रक्तोऽपि तथा प्रत्ययप्रसङ्गात् ॥ ५ ॥

अवयविनि उत्पत्तिदशायां रूपसामान्याभावे नाध्यक्षं प्रमाणम् इन्द्रियसम्बद्धविशेषणताया अभावात् । नाप्यनुमानम् अप्रयोजकत्वात् इत्याशङ्का यत्र तद्धर्म्मावच्छिन्नस्य कस्यचिद्ध्वंसः कस्यचित्प्रागभावः तत्र मध्यमदशायां तद्धर्म्मावच्छिन्नध्वंसादिना विरोधाभावात् ॥ ४ ॥

सामान्याभावं व्यवस्थापयन्नाह, अतएवेति । यत एव ध्वंस-प्रागभावयोरविरोध इत्यर्थः, पूर्व्वापरेति रक्तत्वात्तथा प्रत्यय-प्रसङ्गात्, रक्तत्वावच्छिन्नप्रतियोगिताकेन संसर्गेण रक्तत्वविशिष्ट-रूपनिरूपिता या प्रकारता तच्छालीप्रत्ययप्रसङ्गादित्यर्थः, तच्च तत्र बाधितम् कस्यचिद्रक्तस्य विद्यमानत्वादिति प्रक्रान्तयत्किञ्चित् ध्वंसस्य प्रागभावस्य च तत्र विद्यमानत्वादित्यर्थः, न च रक्तं नास्तीतिप्रतीतेः रक्तत्वावच्छिन्नाभावविषयत्वं वाच्यम् । अन्तरा-श्यामेऽपि रक्तं नास्तीतिप्रतीतेरपलापप्रसङ्गात्, न हि ध्वंसप्राग-भावयोः सामान्याभावत्ववादिमतेऽपि तत्र रक्तत्वावच्छिन्नध्वंस-प्रागभावौ स्त इति । न च रक्तत्वावच्छिन्नध्वंसभ्रम एव इति वाच्यं विशेषदर्शिनोऽपि तथा बोधात् तथाच रक्तं नास्तीति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्सामानाधिकरण्यञ्च स्वविशिष्टहेत्वधिकरणाव-च्छेदेन बोध्यं तेन गोत्वजन्यद्रव्यत्वप्रलयावृत्तित्वा-दिना गवादेरभावस्य गवाद्यनधिकरणदेशावच्छेदेन तद्वति काले महाकाले वा वृत्तावपि यदा गोत्वं तदा गौर्यत्र कालत्वं तत्र जन्यद्रव्यं प्रलयावृत्तिर्व्वेत्यादौ नातिप्रसङ्गः ।

प्रतीते रक्तत्वावच्छिन्नाभावविषयत्वं वाच्यम्, स चेदन्तराश्यामे वर्त्तते तदा गतं ध्वंसप्रागभावयोर्व्विरोधेनेति ॥ ५ ॥

तेनेत्यादि । प्रकृतहेत्वोर्व्यभिचार इत्यत्यन्ताभावाद्य न खण्ड-प्रलये ब्रह्माण्डान्तरे तदानीं गवादेः सत्त्वात् इति महाप्रलये तत् प्राक्कालादौ व्यभिचारो बोध्यः, तत्र स्थूलद्रव्याणां गवादीनां आदौ नाशः, तदनन्तरं द्व्यणुकपर्य्यन्तानां जन्यद्रव्याणां नाशः, तदनन्तरं गुणानां नाशः इत्यभ्युपगमात्, क्रमेण त्रींस्त्रीनभावानादाय प्रकृत-विशेषणाद्व्यभिचारमुद्धर्त्तुं गोत्वेत्याद्युक्तं, जन्यस्य कालोपाधित्वा-नङ्गीकर्त्तृमते अयोगोलकान्यत्वाद्यभावस्य पर्व्वताद्यवृत्तित्वात् धूम-वान् वह्नेरित्यत्र नातिव्याप्तिरिति तदुपेक्ष्य गोत्वाद्यनुधावनं, ननु सृष्टिकाले गवाद्यनधिकरणदेशावच्छेदेन गवाद्यभावो विवाद-ग्रस्तः, इदानीं भूतले गौर्नास्ति इत्यादिप्रतीत्या साधनीयः तस्याश्च भूतलादौ तत्कालीनत्वावच्छेदेन दैशिकसम्बन्धावच्छिन्न-गवाद्यभाववत्त्वं किंवा काले तादृशदेशावच्छेदेन कालिकसम्बन्धाव-च्छिन्नतदभाववत्त्वं चाविषय इति विवादात् इत्यत आह, महा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुमतिप्रलये तत्सामानाधिकरण्याभावात् । स्वविशिष्टेतिविशेषणात् कपिसंयोगाभाववान् मेयत्वा-

---

काल इति। एतद्विवादतत्त्वम् तु सिद्धान्तलक्षणे वक्ष्यते । महाप्रलयाभावाभावस्य महाप्रलयात्मकस्य सृष्टिकाले प्रतियोगिसामानाधिकरण्यान्महाकालपर्य्यन्तानुधावनमिति केचित्, तन्न तस्यापीदानीन्तनध्वंसात्मककालोपाधौ प्रतियोगिमति वृत्तेः कालिकव्याप्तिं दर्शयित्वा दैशिकीमाह, यत्रेति । जन्यद्रव्यत्वमपेक्ष्य व्यापकरूपेणापि अतिव्याप्तिं दर्शयितुं प्रलयावृत्तिर्वेति । त्रयाणामेव साध्याभावानाम् एकमेव प्रलयाभावमादाय विशेषणाभावं दर्शयन्नाह, हेतुमतीति ।

ननु प्रलयान्यत्वाभावस्य तादृशस्य कथं प्रतियोगिसामानाधिकरण्यं न हि प्रलयान्यत्वाभावाभावो दैशिकसम्बन्धेन सृष्टिकाले महाकाले वा वर्त्तते येन प्रतियोगिसमानाधिकरण्यं सिध्येत, न च प्रलयान्यत्वस्यापि नित्यतया कालिकसम्बन्धेन प्रलये वृत्तेः प्रतियोगिसामानाधिकरण्यमिति वाच्यं व्यापकताघटकेन दैशिकविशेषणताविशेषेण प्रतियोगिनोऽभावाधिकरणासम्बद्धत्वादिति चेन्न हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे येन सम्बन्धेन वर्त्तमानत्वम् अभावस्य तेनैव सम्बन्धेन व्यापकताघटकसम्बन्धावच्छिन्नप्रतियोग्यधिकरणवृत्तित्वं वक्तव्यं भवति, हि कालत्वाधिकरणे प्रलये कालिकसम्बन्धेन प्रलयान्यत्वाभावस्य वृत्तेः व्यापकताघटकसम्बन्धेन दैशिकविशेषणताविशेषेण प्रलयान्यत्वाऽधिकरणे महाकाले

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दित्यादौ संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधिकरणावृत्तित्वेऽपि नाव्याप्तिः ॥ ६ ॥

कालिकसम्बन्धेन प्रलयान्यत्वाभावस्य वृत्तित्वमित्यतिव्याप्तिसम्भावनया विशेषणदाने च तदभावस्य कालिकसम्बन्धेनाधिकरणे प्रलये दैशिकविशेषणताविशेषेण सम्बन्धेन प्रलयान्यत्वस्यानधिकरणत्वान्नातिव्याप्तिः। न च तथापि महाकालो घटवान् महाकालाकाशान्यतरत्वात् इत्यादौ ये ये तादृशाकाशान्यत्वाभावादयो विशेषणताविशेषेणाकाशमात्रवृत्तयः त एव कालिकसम्बन्धेन स्वविशिष्टयावद्धेत्वधिकरणीभूतकाले व्यापकताघटकसम्बन्धेन प्रतियोगिसमानाधिकरणा इत्यतिव्याप्तिरिति वाच्यं, येन येन सम्बन्धेनाभावानां हेत्वधिकरणे स्ववैशिष्ट्यं तावत्सम्बन्धेन स्वविशिष्टहेत्वधिकरणावच्छेदेन व्यापकताघटकसम्बन्धावच्छिन्नप्रतियोग्यधिकरणवृत्तित्वस्य विवक्षितत्वात् भवति, हि स्ववैशिष्ट्यं आकाशेऽपि विशेषणताविशेषेण तत्र च प्रतियोग्यधिकरणवृत्तित्वाभाव इति कपिसंयोगाभावेत्यादि प्राचां मते संयोगाभावसाध्यके प्रमेयत्वं व्यभिचारीति कपीति ननु कपिसंयोगाभाववति द्रव्ये वर्त्तमानस्य कपिसंयोगात्मकाभावस्य प्रतियोगितावच्छेदकत्वात्, न च कपिसंयोगस्य प्रतियोगिसमानाधिकरणत्वात् अभावान्तरस्य च अनवच्छेदकत्वम् प्रकृतप्रतियोगिताया अक्षतमिति वाच्यम्, प्रकृतव्यापकतायां प्रतियोगिसामानाधिकरण्याप्रवेशस्यैव सम्यक्त्वात् तत्र तत्पदं निविश्य स्वविशिष्टपद-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दानस्य सन्दर्भविरुद्धत्वात्, न च अखण्डाभावेनावैयर्थ्यमिति वाच्यं तथापि अनतिप्रयोजनकत्वादिति चेन्न तद्दाने हि व्यापकत्व-मीदृशाभाववादिमते निर्व्वक्तुमशक्यम्, तथा हि तद्वन्निष्ठात्यन्ता-भावाप्रतियोगित्वम् न प्रतियोगिताश्रयस्य, अव्यापकत्वं तस्य तत्र व्यधिकरणधर्म्मावच्छिन्नाभावसत्त्वात् नापि प्रतियोगितायाः तादृशाभावप्रतियोगितानवच्छेदकत्वं प्रतियोगितारूपेण घटा-दीनामभावस्य विद्यमानत्वात्, नापि तादृशाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वं प्रकृतप्रतियोगितायाः वह्निमान् धूमादित्यत्र वह्निव्यापकतावच्छेदिकया प्रतियोगितया पर्व्व-तादौ महानसीयकिमपि नास्तीतिप्रतीतिसिद्धाभावस्य वह्नि-मत्पर्व्वतादिनिष्ठस्य सामानाधिकरण्येन प्रतियोगितायाः प्रति-योगितावच्छेदकत्वात्, नापि तादृशाभावप्रतियोगितायाः अनति-रिक्तवृत्तिभिन्नत्वमिति वाच्यम्। वह्निनिष्ठप्रतियोगिताप्रकारेण वह्निधूमोभयाभावस्य वह्निसमानाधिकरणस्य प्रतियोगितायाः अनतिरिक्तवृत्तिरेव तादृशप्रतियोगितेति तस्या व्यापकत्वावच्छेद-कत्वच्चतेः।

नाप्यन्यूनवृत्तित्वं, तादृशतत्तद्व्यत्त्यभावनिरूपितप्रतियोगितायाः अन्यूनवृत्तित्वादेव तत्प्रतियोगितायाः, तथाच सामानाधि-करण्येन अन्यूनानतिरिक्तवृत्तियदवच्छेदकं तदन्यत्वमेव वक्तव्यम्, एवं यथा तथा निरुच्यतां तदपेक्षया प्रतियोगिताप्रकारेण उप-दर्शिताभाववारणन्तु प्रतियोगिव्यधिकरणपदेनैव इति। न च घटाद्यभावस्यापि घटत्वेन प्रमेयं नास्तीत्यादिप्रतीतिसिद्धाभावा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्याभावस्तु जलत्वाद्यभावो न तु धूमाद्यभावः जलादावपि तदभाव-

भिन्नतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यं, प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यस्यैव विवक्षितत्वात्। अन्यत्र सिद्धान्तलक्षणरीत्या अवधेयम्, व्यवहारसिद्धप्रतियोगिवैयधिकरण्याघटितव्यापकतामादाय साध्यसामानाधिकरण्यावच्छेदकेत्यादिव्यापकतामादाय वा स्वविशिष्टपददानमित्यपि केचित्। यत्तु वह्निमान् धूमादित्यत्र तार्णातार्णोभयवह्न्यभावस्यापि तादृशत्वात् तस्य च तादृशोभयवत्यवर्त्तमानस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावात् अव्याप्तिरिति स्वविशिष्टपददानमिति तन्न तादृशोभयवतोऽपि कालिकसम्बन्धादिना तादृशाभाववत्त्वे बाधकाभावात्, सत्तावान् द्रव्यत्वादित्यत्र नित्यत्वविशिष्टसत्ताभावस्य हेतुसमानाधिकरणस्य हेत्वधिकरणावच्छेदेन अवृत्तेरव्याप्तेर्वारणाय अयमात्मा ज्ञानादित्यत्रैतदात्मान्यत्वविशिष्टात्मत्वावच्छिन्नप्रतियोगिताकाभावस्य एतद्भिन्नावृत्तित्वेनाव्याप्तेर्वारणाय च स्वविशिष्टेति नव्याः।

केचित्तु इदं प्रमेयं वाच्यत्वादित्यत्र प्रमेयत्वभेदस्य तादृशस्य प्रमेयत्वे वर्त्तमानस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावात् उभयोरेव लक्षणयोरव्याप्तिरिति स्वविशिष्टपदमित्याहुः ॥ ६ ॥

ननु धूमवान् वह्नेरित्यत्रातिव्याप्तिः धूमाभावे जलवृत्तित्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्ययप्रसङ्गात्। यत्समानाधिकरणानां साध्यताव-
च्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगि-

विशिष्टगोत्वाभावो नास्तीतिप्रतीतेर्धूमाभावस्वरूपालम्बनत्वस्य सम्प्रदायसिद्धत्वेन धूमाभावस्य गोत्वाभावप्रतियोगिसामानाधिकरण्यादित्यत आह, जलादिवृत्तित्वेति जलादावपीति। न च धूमाभावस्य तादात्म्येन गोत्वाभावाभावरूपत्वमिति कुतोऽतिप्रसङ्गसम्भव इति वाच्यम् अनन्ताभावानां तादात्म्येन तादृशगोत्वाभावाभावरूपत्वकल्पनमपेक्ष्य एकस्यैव जलत्वाभावस्य तथात्वं कल्प्यते लाघवादित्यभिप्रायात्। ननु धूमवान् वह्नेरित्यत्र तथापि अतिव्याप्तिर्धूमवद्वृत्तित्वविशिष्टगोत्वाभावस्य उक्तन्यायेनधूमाभावाभावतया तस्य च गोत्वाभावरूपप्रतियोगिसामानाधिकरण्यात्, न च संयोगात्मकव्यापकताघटकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यान्न तथेति वाच्यम् अयोगोलकनिष्ठसंयोगिपदार्थधूमान्यतरयोर्धूमवद्वृत्तित्वविशिष्टत्वेन रूपेण योऽभावः सोऽपि धूमाभावसमनियत इति, अतिव्याप्तितादवस्थ्यादिति समनियताभावभेदाभिप्रायेणैवेदं वाच्यं, तच्च स्वासम्मतम् इत्यस्वरसात्, स्वमते लक्षणान्तरमाह, यदिति। तथाचोक्ताभाववारणाय प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यमवश्यं वाच्यं, तथाच सत्तावान् जातेरित्यत्राव्याप्तिर्द्रव्यवृत्तित्वविशिष्टसत्ताभावस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रयियोगिताकत्वात् तस्य च तादृश-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ताकानां यावदभावानां प्रतियोगितावच्छेदकावच्छिन्न-सामानाधिकरण्यं तत्त्वं वा तत् ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभ एव। शेषं दर्शितदिशावसेयम् अत आह प्रतियोग्यवृत्तिश्चेति ॥ ७ ॥

प्रतियोगिसामानाधिकरण्याभावात्। अतः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नेत्यादि, नन्वत्र व्यापकतावच्छेदकेति त्यज्यतामिति चेत्, लघुसमनियतगुरुसाध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्याव्याप्तिः तत्पददाने तु लघुना व्यापकतावच्छेदकरूपेणावच्छिन्नप्रतियोगिताकत्वमभावस्य इति नाप्रसिद्धिरिति केचित्। प्रत्यवयवव्यावृत्तिस्तु पूर्व्ववत् बोध्या, रूपपदन्तु व्यापकतावच्छेदकपर्य्याप्त्यधिकरणतालाभार्थं तेन तत्तद्वह्नित्वस्य वह्नित्वस्य रूपत्वेऽपि न व्यापकतावच्छेदकत्वमिति वाच्यत्वादीनामित्यादिपदेन ज्ञेयत्वत्वेन घटाद्यभावोऽपि द्रष्टव्यः।

शेषमिति सम्बन्धादिनैयत्यमित्यर्थः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदिका यावत्यः प्रतियोगिताः प्रत्येकं तद्विशिष्टसामानाधिकरण्यं विवक्षणीयं, तथाच धूमादिनिष्ठा या तादृशी प्रतियोगिता तद्विशिष्टसामानाधिकरण्याभावात् नातिव्याप्तिरिति पूर्व्वलक्षणमपि निर्दोषम् इति नवीनाः।

अथैतल्लक्षणं व्यधिकरणधर्म्मावच्छिन्नाभावानङ्गीकारेऽपि सुस्थं सर्व्वत्र साध्यतावच्छेदकावच्छिन्नसाध्यादिभेदमादायैव निर्व्वाहात्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथाच प्रतियोग्यवृत्तिश्चेत्यादेरवतारणं विरुद्धम् इति चेत् ईदृश-लक्षणे नञर्थस्य बहुशः प्रविष्टत्वात्, तस्य च व्यधिकरणधर्म्मावच्छिन्नाभावतो वैलक्षण्यार्थं विशेषणस्यावश्यकत्वात् इति चेदत्र वह्नित्वेन धूमाभाववति किमपि धूमवद्वृत्तिर्नास्तीतिप्रतीति-सिद्धाभावस्य धूमाभावाभिन्नतया तस्य च वह्नित्वावच्छिन्नवह्नि-समानाधिकरणतया वातिव्याप्तिः, न च पर्व्वते वह्निकाले धूमस्य प्रागभावदशायां धूमो नास्तीतिप्रतीतिर्वर्त्तते तदानीं च वह्नित्वेन धूमवद्वृत्तिसत्ता तदभावस्य च धूमाभावन्यूनवृत्तित्वात् क्वाभेद इति वाच्यं वह्नित्वेन धूमकालोपहितधूमवद्वृत्ति किमपि नास्ति इतिप्रतीतिसिद्धाभावमादाय तथापि तद्दोष-तादवस्थ्यात् न चायोगोलकान्यत्वाभावमादायातिव्याप्तिरुद्धार इति वाच्यम् अयोगोलकमात्रवृत्तिर्यो भेदः तदयोगोलकान्यत्वा-न्यतरत्वरूपेणायोगोलकान्यवृत्तिकिमपि नास्ति इतिप्रतीति-सिद्धाभावस्य तादृशान्यतरत्वावच्छिन्नसामानाधिकरण्यस्य सत्वा-दतिव्याप्तितादवस्थ्यात् एवं लक्ष्यान्तरमपि ऊह्यम् इत्याहुः। अत्र वदन्ति, वह्नित्वेन किमपि धूमवद्वृत्ति नास्तीतिप्रतीतौ दण्डेन पुरुषो नास्तीत्यत्रेव विशिष्टधर्म्म एव प्रतियोगितावच्छेदको न तु शुद्धवह्नित्वम्। न च धूमवद्वृत्तिकिमपि नास्तीत्यंशे तादृश-निखिलस्यैव प्रतियोगित्वावगाहनेनान्यांशे वह्नित्वविरहेण च शुद्ध-वह्नित्वस्यैवावच्छेदकत्वम् इति वाच्यं सर्व्वत्राभावप्रतीतौ यावत् प्रतियोगिनोऽभावेन प्रमाणाभावात् सामान्यलक्षणयोर्दुर्व्वारत्वा-पत्तेरिति ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य साध्याभावस्य प्रतियोगिताया अनवच्छेदकं हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणस्य वा अभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः

चक्रवर्त्तिलक्षणमाह, केचिदिति। इदं कपिसंयोगी एतत्त्वादित्यत्राव्याप्तिवारणाय व्याप्यवृत्तेरिति वह्नित्वेन रूपेण ह्रदत्वाभावमादाय वह्निमान् धूमादित्यत्राव्याप्तिवारणाय साध्येति, अत्र प्रतियोगिव्यधिकरणपददाने इदं वाच्यं प्रमेयत्वादित्यत्र प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धिरिति तदुपेक्षितमिति ध्येयम्। ननु वह्नित्वावच्छिन्नह्रदत्वाभावेन समं ह्रदत्वावच्छिन्नवह्न्याभावस्यैक्यात् साध्याभावात्मकस्य तस्य प्रतियोगितावच्छेदकमेव वह्नित्वमित्यव्याप्तमतः समनियताभावानामैक्यमते लक्षणमाह, हेतुसामानाधिकरणस्येति। ननु व्याप्यवृत्तित्वं न स्वसमानाधिकरणात्यन्ताभावाऽप्रतियोगित्वं रूपव्यापकतालक्षणोक्तदूषणग्रासात् इत्यभिप्रेत्याह प्रतियोगिव्यधिकरणस्य वेति। ननु प्रतियोगिवैयधिकरण्यं यदि प्रतियोगिसमानाधिकरणभिन्नत्वं तदा व्यधिकरणधर्म्मावच्छिन्नाभावस्य तावतैरवारणं सामानाधिकरण्येनेति व्यर्थम्, एवं प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणभिन्नत्वोक्तावपीति चेत् अन्यूनानतिरिक्त-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवञ्च व्याप्तिरव्यभिचाररूपतापि सङ्गच्छते हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्येव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात्। अवच्छेदकत्वञ्चेह तत्-

---

वृत्तितत्तत्प्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिसमानाधिकरणा ये ये अभावा अव्याप्यवृत्तिप्रतियोगिकाः प्रसिद्धाः तावद्भेदकूटस्य विवक्षितत्वात् तथाच तादृशव्यधिकरणधर्म्मावच्छिन्नाभावमादायाव्याप्तिरिति, सामानाधिकरण्येनेति। ननु तथापि वह्निमान् धूमादित्यत्राव्याप्तिः वह्नित्वेन वह्निधूमोभयाभावस्य प्रतियोगितायाः सामानाधिकरण्येन वह्नित्वाद्यवच्छेद्यत्वात् इति चेत् प्रतियोगिताया अन्यूनवृत्ति यदवच्छेदकं तदन्यत्वस्योक्तत्वात्, अवच्छेदकपददानाच्च, महानसीयवह्न्यभावप्रतियोगिताया अन्यूनवृत्तित्वेऽपि वह्नित्वस्य न क्षतिः, वह्नित्वावच्छिन्नवह्निधूमोभयाभावस्य वह्नित्वावच्छिन्नवह्निसमानाधिकरणत्वात् प्रतियोगीत्यादिपदेनैव वारणमित्यपि कश्चित्।

एवञ्चेति। तथाचाव्यभिचारस्य पारिभाषिकतानिर्व्वचनेऽपि न क्षतिरित्यन्यलक्षणेभ्यो वैलक्षण्यमिति भावः। साध्यतावच्छेदक इति। न च साध्यतावच्छेदके तादृशसाध्याभावप्रतियोगितावच्छेदकत्वाप्रसिद्धिरिति वाच्यम्। वाच्यत्वत्वघटाभ्यां वाच्यत्वं नास्तीति प्रतीत्या तत्सत्त्वात्। ननु विशिष्टवह्न्यभावस्य विशिष्टवह्नित्वमेव प्रतियोगितावच्छेदकं तच्च विवक्षितविवेकेन वैशिष्ट्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पर्य्याप्त्यधिकरणत्वं तेन विशिष्टवह्न्यभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः। सत्ववति च गुणादौ संयोगाद्यभावोऽपि व्याप्यवृत्तिर्वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यम्। भवति च गुणत्व-गुणावृत्तित्व-द्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकगुणत्वाद्यनतिरिक्तवृत्त्यैव संयोगत्वमित्याहुः ॥ ८ ॥

एव पर्य्याप्तमित्यत आह, ह्रदत्ववह्नित्वोभयेति। ननु इदं संयोगिसत्वादित्यादौ संयोगाभावस्याव्याप्यवृत्तित्वात् व्याप्यवृत्त्यभावान्तरस्य प्रतियोगितानवच्छेदकत्वमेव संयोगाभावत्वस्येत्यतिव्याप्तिरित्यत आह, सत्ववतीति व्याप्यवृत्तिरिति। तथाच तदधिकरणावच्छेदेन व्याप्यवृत्तित्वं ग्राह्यमिति भावः। अतएवारुचेराह, वक्ष्यमाणं वेति। व्याप्तिसिद्धान्तलक्षणे वक्ष्यमाणमित्यर्थः तेन सत्तावान् जातेरित्यत्र जात्यधिकरणगुणादिनिष्ठाभावप्रतियोगितावच्छेदकस्य विशिष्टसत्तात्वस्यानतिरिक्तवृत्तित्वेऽपि सत्तात्वस्य न क्षतिः। ननु गुणत्वावच्छिन्नाभावस्यापि स्वमते उत्पत्तिकालावच्छेदेन प्रतियोगिसमानाधिकरणत्वात् संयोगाभावतुल्यत्वम् अतो रूपान्तरेणाभावमादाय तदाह, गुणावृत्तीति। ईदृशाभावस्तु द्रव्यावृत्तिस्तेन उत्पत्तिकालेऽपि गुणावृत्तिद्रव्यवृत्तिजातीनां सत्वादिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणसाध्याभावत्वकत्वम्।

यत्समानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं वाव्याप्तिरिति तु न युक्तं सर्व्वत्र साध्याभावपदवैयर्थ्यात्। यत्तु साध्याभाव-

---

भावः। इदं संयोगिगुणान्यत्वे सति सत्वादित्यादिसाधारणसंयोगव्यभिचारिणिसत्वे यादृशरूपावच्छिन्नाभावमादाय नातिव्याप्तिः तदाह, द्रव्यमात्रेति ॥ ८ ॥

प्रगल्भीयं लक्षणमाह, साध्येति। स्वं हेत्वभिमतम् इदं गुणकर्म्मान्यत्वविशिष्टसत्तावत् सत्वादित्यत्र गुणकर्म्मान्यत्वविशिष्टसत्तात्वावच्छिन्नाभावादीनां साध्यसमानाधिकरणत्वादतिव्याप्तिराह, साध्यतावच्छेदकावच्छिन्नेति। सामानाधिकरण्यावच्छेदकत्वं सामानाधिकरण्यानतिरिक्तवृत्तित्वं व्याप्यत्वमिति यावत्।

ननु वह्निमान् धूमादित्यत्र धूमवति वह्न्यभाववत्त्वभ्रमस्य साध्यवत्त्वज्ञानप्रतिबन्धकत्वात् अव्याप्तिरिति द्वितीयलक्षणे प्रमायामिति प्रमात्वावच्छेदेनेत्यर्थः, तेन धूमवान् वह्नेरित्यत्र व्यधिकरणधर्म्मावच्छिन्नाभावप्रमायां साध्यवत्त्वज्ञानाप्रतिबन्धकत्वेऽपि न क्षतिः। प्रमा च सर्व्वांशे बोध्या, तेन घटाभावस्य साध्यप्रतियोगिकत्वभ्रमेऽपि न क्षतिः। सर्व्वत्रेति तादृशसाध्यसामानाधिकरण्यावच्छेदकस्वसमानाधिकरणकत्वमित्यत एव प्रथमस्य, यत्समानाधिकरणप्रमात्वावच्छेदेन साध्यवत्त्वज्ञानाप्रतिबन्धकत्वम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति तन्न अनुमित्यविरोधित्वज्ञानस्यानुमिति हेतुत्वे साध्याभाववद्वृत्तित्वस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात् ॥ ८ ॥

इत्यत एव द्वितीयस्य च सामञ्जस्यात्, इति साध्याभावपदं सार्थकं कर्त्तुं दूषणान्तरेण तस्यैव लक्षणं दूषयितुमुपन्यस्यति, यत्विति। यद्वृत्तौ यद्वृत्तित्वसामान्ये तेन व्यभिचारिणि-व्यधिकरणधर्म्मावच्छिन्नाभाववद्वृत्तित्वस्याविरोधित्वेऽपि नातिव्याप्तिः। विरोधित्वं विरोधिप्रमाविषयतावच्छेदकत्वं, व्यभिचारिणि तु साध्याभाववद्वृत्तित्वज्ञानत्वेनैव विरोधित्वम्, एतेन यद्वृत्तितात्वावच्छेदेन प्रकृतानुमित्यविरोधित्वम् इत्यनेनैव सामञ्जस्ये साध्याभावपदवैयर्थ्यमिति परास्तं, केवलवृत्तित्वज्ञानत्वेनैव कुत्रापि प्रतिबन्धकत्वाभावादिति भावः। अत्रेदं चिन्त्यं यथा केवलवृत्तित्वज्ञानत्वेन प्रतिबन्धकत्वं तथैतन्मते साध्याभाववद्वृत्तित्वेनापि किन्तु साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वे नैव तथा प्रसक्तेः। अथ प्रतिबन्धकता येन तेन रूपेणास्तु किन्तु हेतुनिष्ठानां साध्याभाववद्वृत्तित्वानां यावतामेव तथात्वं वक्तव्यमिति चेत् तर्हि हेतुनिष्ठवृत्तित्वानामेव तथात्वमस्तु इति साध्यपदवैयर्थ्यमत्रापि दुरुद्धरमिति। अनुमित्यविरोधित्वेति। एतद्व्याप्तिवादिमते एतद्व्याप्तिविघटकमेव प्रतिबन्धकं साध्याभाववद्वृत्तित्वज्ञानं तु न तथा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयाः ये तत्तदधिकरणावृत्तित्वाभावास्तद्वत्त्वं, तत्त्वं साजात्यञ्च समानासमानाधिकरणधर्म्मावच्छिन्नप्रति-

---

किन्त्वनुमितिविरोधिसाध्याभाववदवृत्तित्वज्ञानमेव तथाच साध्याभाववद्वृत्तित्वस्याताद‍ृशत्वे व्यभिचारिण्यतिव्याप्तिरिति भावः ॥८॥

मिश्रलक्षणमेव बहुधा परिष्कुर्व्वन्नाह, केचित्त्विति। ननु समानाधिकरण-धर्म्मावच्छिन्न-प्रतियोगिताकयावन्निरूपितप्रकृत-साजात्यं व्यतिरेकिण्यप्रसिद्धमत आह, प्रत्येकमिति। ननु यावतां साध्याभावानां प्रत्येकनिरूपितं यत् साजात्यं तद्वन्नेकोऽप्यभाव इत्यत आह, तत्तदिति। यावत् पदस्य सजातीयपदस्य चाऽकरणेऽतिव्याप्तिस्फुटैव तत्तदधिकरणाप्रसिद्धिर्वैयर्थ्यञ्चेत्यतः तत्तदिति साजात्यञ्चेत्यादि। ननु केवलेन तत्तत्पदेन यावत्त्वाकर्षणे धूमाभाववान् धूमाभावात् इत्यादौ तादृशसाध्याभावरूप-यावद्धूमाधिकरण इत्यत इदं वाच्यं, ज्ञेयत्वादित्यत्र प्रकृतसाध्याभावे स्वकीयप्रतियोगितासमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वतद्व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण साजात्यं वृत्तित्वाभावस्य वक्तव्यम्, तथाच स्वकीयप्रतियोगितासमानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वमप्रसिद्धम्, वाच्यत्वत्वरूपेण वाच्यत्वाभावाप्रसिद्धेरिति चेत् सत्यं सम्बन्धान्तरेण वाच्यत्वत्वावच्छिन्नाभावादेः सुलभत्वात्। तथाचायमर्थः ये ये प्रकृतसाध्यतावच्छेदकसम्बन्धेनावच्छिन्नप्रतियोगिताकाः साध्याभावस्तत्प्रतियोगितासमानाधि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगिताकत्वान्यतररूपेण साध्याभावस्य पूर्व्वोक्तरीत्या प्रत्येतव्यः ।

व्याप्यवृत्तिश्च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो वा तेन तत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्व्वा

करणधर्म्मावच्छिन्नप्रतियोगिताकत्वं सम्बन्धान्तरावच्छिन्नाभावनिष्ठं प्रसिद्धं तदा दायैवान्यतरत्वस्य प्रसिद्धिरिति द्वितीयेति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका इत्यर्थः । प्रथमरीत्या तु वह्निमान् धूमादित्यादौ वह्निघटोभयाभावसजातीयतद्वृत्तित्वाभावाभावाद्दोष इति ध्येयम् न च वह्नित्वेन पर्व्वतीयवह्निद्रव्यान्तरयोरन्यतराभावस्य साध्यतावच्छेदकेत्यादिरूपशालिनोऽधिकरणमपर्व्वतमेव, अपर्व्वतवृत्तिप्रतियोगिकताद्दशाभावश्च हेतावसम्भवीति वाच्यम् ताद्दशव्यापकतावच्छेदक रूपावच्छिन्नेत्यत्र रूपस्य प्रतियोगिताया अन्यूनवृत्तिसमानाधिकरणतया यदवच्छेदकं तदन्यत्वे नावच्छेदकत्वं वाच्यं, तच्चोभयथा अन्यूनवृत्तिसमानाधिकरणतया केवलव्यधिकरणतया वेति ।

ननु व्याप्यवृत्तित्वं पूर्व्वोक्तरीत्या दुर्व्वचम् इत्यत आह, प्रतियोगितावच्छेदकावच्छिन्नेति । प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरण इत्युक्ते व्यधिकरणधर्म्मावच्छिन्नाभावासंग्रह इत्यत आह, प्रतियोगीति । यद्यप्यत्रापि वाच्यत्वत्वरूपेण वाच्यत्वघटोभयं नास्तीतिप्रतीतिसिद्धाभावेन समं प्रमेयत्वत्वावच्छिन्नवाच्यत्वाभा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यस्याभाववति हेतोर्वृत्तावपि नाव्याप्तिः । तद्वृत्तित्वाभावस्तु तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकस्तत्तत्साध्यभाववद्वृत्तितात्वातिरिक्तसमानाधिकरण-धर्म्मानवच्छिन्नप्रतियोगिताको वा बोध्यः तेन साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशेषितस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमादाय नातिप्रसङ्गः । अत्र च

वस्याभिन्नत्वात्, तस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणत्वादप्रसिद्धिः तथापि चक्रवर्त्तिलक्षणोक्तरीत्या प्रतियोगितावच्छेदकावच्छिन्न--प्रतियोगि समानाधि करण-भिन्नत्वं वक्तव्यं व्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताक इत्यनन्तरं तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्त समानाधिकरणधर्म्मानवच्छिन्नप्रतियगिताको वेति क्वचित् पुस्तके पाठः, स हि धूमवान् वह्नेरित्यत्र निर्धूमवृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकपूर्व्वक्षणवृत्तित्वविशिष्टाभावमादायातिव्याप्तिभयेन संगमनीय इति केचित् तन्न निर्धूमवृत्तित्वत्वेन निर्धूमवृत्तित्वविशेषघटान्यतराभावमादाय धूमवान् वह्नेरित्यत्रातिव्याप्तिभयेन साध्याभावसाजात्यत्वस्य प्रतियोगितासमानाधिकरणान्यूनवृत्तिभिन्नत्याद्युक्तधर्म्मेणावश्यकवक्तव्यत्वे कुतः पूर्व्वक्षणवृत्तित्वविशिष्टाभावमादाय दोषो येनोत्तरावतारणिकादीयेतेति इत्थं वृत्तित्वत्वावच्छिन्ना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वं बोध्यम्। तेन वह्न्यभाववति स्वावयवे धूमस्य वृत्तावपि न दोषः, इत्यस्य साध्याभावोऽपि हेतुतावच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमानो ग्राह्यः तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धयापि न क्षतिः ॥ १० ॥

भावविवक्षणमपि सम्यगिति पार्थिवत्वादिविशेषितस्येत्यन्तेन तत्तत्साध्याभाववद्वृत्तित्वत्वव्यापकस्य प्रयोजनकथनं तत्रापि व्यक्तिविशेषनिष्ठवृत्तित्वाभावमादायाधिकसंग्रहाय, पार्थिवत्वादीति विशेषितं यद्वृत्तित्वं तद्वह्नौ नास्ति वह्नेस्तैजसत्वादिति भावः।

साध्याभावोऽपि साध्यतावच्छेदकसम्बन्धेनैव बोध्यः, तेन समवायसम्बन्धावच्छिन्नाभावमादाय वह्निमान् धूमादित्यादौ न दोष इति ध्येयम्। इत्यस्येति हेतुतावच्छेदकसम्बन्धेन वृत्तित्वविवक्षणे सति चेत्यर्थः, तेनेति। यद्यपि वह्निमान् धूमादित्यत्र संयोगसम्बन्धावच्छिन्नप्रमेयसामान्याभावस्याधिकरणे गुणादौ संयोगसम्बन्धेन वृत्तित्वमप्रसिद्धमिति, तत्राप्यव्याप्तिर्वक्तुमुचिता, तथापि तदभावस्योत्पत्तिकालावच्छेदेन द्रव्यवृत्तित्वेन निरुक्तप्रतियोगिव्यधिकरणाद्यनुसन्धाने प्रयासगौरवमत आह, जातीति। तथाच व्यधिकरणधर्म्मावच्छिन्नजात्यभावमादायैव लक्षणगमनमिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकीभूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वम्। साधनस्य तादृशव्यापकताभावप्रतियोगित्वं तदवच्छेदकत्वं वा साधनतावच्छेदकस्य इति तु न वाच्यं द्रव्यं सत्वादित्यादौ सत्तादेर्गुणकर्म्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्न-

---

ननु वह्निमान् धूमादित्यत्र तथाप्यव्याप्तिः, द्रव्यवृत्तिसंयोगसम्बन्धेन प्रमेयत्वावच्छिन्नाभावस्य गुणादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणस्य संयोगेन सम्बन्धेन कस्यचिदधिकरणे द्रव्ये वर्त्तमानस्याप्यधिकरणे गुणादौ हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमप्रसिद्धमिति चेत् प्रतियोगिवैयधिकरण्यावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नपदार्थाधिकरणवृत्तित्वमित्यत्र तात्पर्य्यात् ॥ १० ॥

ननु इदं द्रव्यं गुणकर्म्मान्यत्वे सति सत्वादित्यत्राव्याप्तिः अत्रापि द्रव्यवृत्तित्वस्य गुणादौ सत्तायां सत्वात् विशिष्टस्यानतिरिक्ततयाऽव्याप्तेराह, यद्वेति। तादृशाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदक-रूपावच्छिन्नप्रतियोगिताका-व्याप्यवृत्तयश्चेत्यर्थः अत्र व्याप्यवृत्तिः पूर्व्ववद्बोध्या, धूमवान् वह्नेरित्यत्र निर्धूमजलवृत्त्यभावप्रतियोगित्वाद्वह्नावतिव्याप्तेराह, व्यापकीभूतस्येति। रूप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगिताकतादृशाभावप्रतियोगित्वात् अतिव्याप्तिः स्येयं, प्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वात् अव्याप्तिश्च प्रमेयत्वव्यधिकरणप्रतियोगित्वस्याप्रसिद्धेः ।

यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्तत्प्रतियोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं तत्त्वमित्याहुः । परे तु वृत्तिमद्वृत्तयो यावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः ॥ ११ ॥

वत्संयोगादित्यत्राव्याप्तेराह, व्याप्यवृत्तेरितिक्रमेण प्रयोजनमाह, द्रव्यं सत्त्वादित्यादावित्यादि ।

इतोऽपि लघुलक्षणमाह, यद्वेति । मिश्रान् प्रत्याक्षेपविजृम्भितमिदं यत् सजातीयपदादानेऽपि तदेकदेशेनापि निर्व्वाह इति, न चात्रापि यावद्भिस्तादृशव्यापकतावच्छेदकैः यद्रूपावच्छिन्नं प्रतिव्यापकत्वमवच्छिद्यते इत्यनेनैव सामञ्जसमिति वाच्यं यथोक्तविशेषणविशेष्याभावे न वैयर्थ्यमितिभावात्, कूटपदादानेऽपि सार्व्वभौमीयं लक्षणं परिष्कुर्व्वन्नाह, परेत्विति । अत्र वह्निमान् धूमादित्यादौ व्यधिकरणधर्म्मावच्छिन्नवह्न्यभाववज्जगद्वृत्तित्वत्वसमनियतप्रतियोगिताका ये येऽभावास्तावदाश्रयत्वं, निर्व्वह्निवृत्तित्वत्वसमनियतप्रतियोगिताका ये येऽभावाः, तावदाश्रयत्वमिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

येन सम्बन्धेन हेतुता वृत्तिमद्वृत्तय इत्यत्रापि तेनैव सम्बन्धेन वृत्तिमत्त्वं बोध्यं तेन व्यधिकरणधर्म्मावच्छिन्नवह्न्यभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्त्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः, साध्याभावश्च पूर्व्ववद्बोध्यो व्याप्यवृत्तिश्च तद्वृत्तित्वाभावोऽपि स्वव्या-

---

लक्षणसमन्वयः । व्यभिचारिणि तु निर्धूमवृत्तित्वत्वसमनियतप्रतियोगिताका ये येऽभावा धूमव्याप्येषु प्रसिद्धास्तदभावादेव नातिव्याप्तिः, अत्र यावदित्यनुक्तौ अधिकरणे व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वाभावमादायातिव्याप्तिः, वृत्तिमत्पदादाने सर्व्वत्र प्रायशो व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावस्यावृत्तिमात्रनिष्ठस्याभावादव्याप्तिः, असम्भवस्तु नास्ति तादात्म्येन सम्बन्धेन हेतुतायां व्यधिकरणधर्म्मावच्छिन्नसाध्याभाववति गगनादेरपि तादात्म्येन वृत्तित्वाद्व्यधिकरणधर्म्मावच्छिन्नस्यैवाभावस्य सम्भवाद्धेतौ च तस्य सत्त्वादिति, एवं विषयतादिसम्बन्धेन हेतुतायामपि बोध्यम् ॥ ११ ॥

ननु वह्निमान् धूमादित्यत्र तत्तद्वह्नित्वावच्छिन्नवह्न्यभाववद्वृत्तित्वाभावस्य धूमेऽसत्त्वादव्याप्तिरित्यत आह, साध्याभावश्चेति पूर्व्ववदिति । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताको व्याप्यवृत्तिश्चेत्यर्थः, तेन वह्निमान् धूमादित्यत्र वह्निघटोभयाभावमादाय नाव्याप्तिः, न वा कपिसंयोगाभाववान् द्रव्यत्वादित्यादौ कपिसंयोगाभावाभावकपि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकृततत्साध्याभाववद्वृत्तिताव्यापकप्रतियोगिताकः तत्तत्साध्याभाववद्वृत्तितात्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्म्मेण अनव-

---

संयोगवद्वृत्तित्वस्य सत्त्वाद्द्रव्यत्वादौ इदं कपिसंयोगि एतत्वादित्यत्र तु समानाधिकरणधर्म्मावच्छिन्नकपिसंयोगाभावस्याव्याप्यवृत्तित्वेन व्याप्यवृत्तिव्यधिकरणधर्म्मावच्छिन्नसाध्याभावसजातीयस्य तादृशसाध्याभाववद्वृत्तित्वाभावस्य व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकस्यैव सम्भवतो हेतौ सत्त्वेनाव्याप्त्यभावात्, स्वव्यापकेति स्वं प्रतियोगिता तद्व्यापकं यत्साध्याभाववद्वृत्तितात्वं तस्य व्यापिका या प्रतियोगिता सा यस्य तादृशवृत्तितात्वसमनियतेत्यर्थः, ननु वह्निमान् धूमादित्यादौ धूमनिष्ठवृत्तित्वविशेषमात्रवृत्तिरूपेण तादृशवृत्तित्वसामान्याभावस्य धूमातिरिक्तमात्रवृत्तित्वादव्याप्तिः अत आह, तत्तत्साध्याभावेति। तथाच तादृशवृत्तित्वविशेषमात्रवृत्ति यत् साध्याभाववद्वृत्तितात्वातिरिक्तं रूपं तदवच्छिन्नप्रतियोगिताकत्वात् इति न तस्य संग्रहः, समानाधिकरणेनेति। प्रतियोगितासमानाधिकरणेनेत्यर्थः अतो व्यधिकरणधर्म्मावच्छिन्नप्रतियोगिताकवृत्तित्वाभावस्य परिग्रहः। ननु साध्याभाववद्वृत्तित्ववृत्तिप्रतियोगितासमानाधिकरणत्वमपेक्ष्य साध्याभाववद्वृत्तित्ववृत्तीत्येव लघुतरम् इत्यत आह, साध्याभाववद्वृत्तित्ववृत्तिना वेति। अत्र च इतोऽपि लाघवात् साध्याभाववद्वृत्तितात्वावच्छिन्नाभाव एव आदरणीयः, जगद्वृत्तितात्वावच्छिन्नघटा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्छिन्नप्रतियोगिताको बोध्यः, तेन आलोकाद्यवृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्वस्य यस्येन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावः। तस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वन्तरवृत्तेः स्वस्मिन्न सत्त्वेऽपि न क्षतिरित्याहुः ॥ १२ ॥

भावमादाय निर्व्वह्निवृत्तितात्वावच्छिन्नाभावञ्चादाय वह्निमान् धूमादित्यादौ लक्षणसमन्वय इति नव्याः। स्वव्यापकत्वस्य प्रयोजनमाह, आलोकाद्यवृत्तित्वेनेति। अत्र च आलोकाद्यवृत्तिवृत्त्यभावप्रतियोगिताया घटादिसाधारण्यादव्यापकमेव। वह्निसामान्याभावेति। तादृशवृत्तितात्वव्यापकप्रतियोगितत्वस्य व्यावृत्तिमाह, यस्येति। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वलाभार्थम् इन्धनत्वाद्यनुसरणम्, अत्र महानसवृत्तित्वनिष्ठाप्रतियोगिता तु जगद्वृत्तित्वस्य न व्यापिका इति भावः, ननु महानसवृत्तित्वाभावस्य पर्व्वतीयधूमादौ सत्त्वात् तादृशहेतुमात्रावृत्त्यभावाभावमाह, स्वनिष्ठेति। स्वनिष्ठं धूमादिनिष्ठं यत्साध्याभाववद्वृत्तित्वमित्यर्थः, हेत्वन्तरमालोकादिकं स्वस्मिन् धूमादौ असत्त्वेऽपीति सप्तम्यन्तेनान्वितम्, ननु तथापि जगद्वृत्तित्वेन रूपेण धूमनिष्ठजगद्वृत्तित्वविशिष्टघटान्यतराभावस्यापि साध्याभाववद्वृत्तितात्वातिरिक्त-समानाधिकरण-धर्म्मानवच्छिन्नप्रतियोगिताकत्वात्, तस्य च धूमादौ असत्त्वादव्याप्तिरिति चेन्न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्ये तु वृत्तिमद्वृत्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावास्तद्वत्वं तादृशवृत्तित्वाभावश्च स्वव्यापकतादृशवृत्तितात्वव्यापकप्रतियोगिताकोबोध्यः, प्रयोजनञ्चोक्तप्रायं साध्याभाववद्वृत्तितात्व-

---

प्रकृतप्रतियोगितानतिरिक्तवृत्तीभूतं यत्साध्याभाववद्वृत्तितात्वं तदतिरिक्तेन समानाधिकरणधर्म्मेणानवच्छिन्नप्रतियोगिताकत्वम् इत्यस्य विवक्षितत्वात्, भवति च घटसाधारण्याः प्रकृतप्रतियोगितायाः अतिरिक्तवृत्त्येव तादृशवृत्तितात्वम् इति। अत्र च मिश्रलक्षणोक्तसाध्याभाववद्वृत्तितात्वव्यापकव्यासज्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताकत्वविवक्षणे आलोकाद्यवृत्तित्वावच्छिन्नाभावस्य यावन्मध्यपतितस्य अवारणम् इति तन्नोक्तम्। तत्र च यावत् पदाभावात् न सम्यगिति अत्र परत्र च आकाशहेतुकेऽतिव्याप्तिः वृत्तिमत्वविवक्षया इष्टापत्त्या वा समाधेया ॥ १२ ॥

अन्येत्वित्यादि। अत्र च वृत्तिमत्पदप्रयोजनं केवलान्वयिन्येव बोध्यं, व्यतिरेकिणि तु तादृशकूटाधिकरणवृत्तित्वाभावस्य अवृत्तिमात्रवृत्तित्वाभावात्, एवं तत्र हेतुतावच्छेदकसम्बन्धेन वृत्तिमत्वृत्तित्वविवक्षणस्यापि प्रयोजनं बोध्यं कूटपदं सार्थकीकर्त्तुं तत्तदिति विहाय समनियतप्रतियोगिताकत्वमेव अनुवदति, तादृशेति।

उक्तप्रायमिति प्रतियोगिताव्यापकेत्यस्य व्यावृत्तिस्तु पूर्व्ववदेव बोध्या, तादृशवृत्तितात्वव्यापकप्रतियोगितेत्यस्यव्यावृत्तिस्तु न वह्निमान् धूमादित्यादौ महानसस्य कूटाधिकरणत्वाभावात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यापकप्रतियोगिताकस्य च व्यधिकरणधर्म्मावच्छिन्ना-भावस्यैव वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरतः समुदायेति। साध्याभावश्च साध्यतावच्छेदकसम्बन्धेन बोध्यः, तेन समवायेन वह्निः साध्यत्वे धूमे संयोगेन च तथात्वे वह्न्यवयवत्वे पर्व्वतवह्न्यवयवसंयोगे च पर्व्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधि-

---

धूमनिष्ठवृत्तित्वस्य तादृशकूटाधिकरणवृत्तितात्वाभावात् किन्तु इदं वाच्यं ज्ञेयत्वादित्यादौ अतएवाह, उक्तप्रायमिति। समुदाय-स्येतीति निर्धूमवृत्तित्वाभावस्य प्रतियोगिता न साध्याभाववद्वृत्ति-तात्वस्य व्यापिका साध्याभाववद्वृत्तितात्वस्य जगद्वृत्तित्वेऽपि सत्वात् येन निर्धूमवृत्तित्वाभावमादाय कूटपदादानेऽपि याव-त्पदेनैव व्यभिचारिवारणं भवेत्, तद्दाने तु निर्धूमवृत्तित्वाभाव-प्रतियोगिताया एव तथाविधकूटाधिकरणवृत्तितात्वव्यापकत्व-लाभादिति ध्येयम्। तेनेत्यादि—धूम इति। पूर्व्वान्वयि तथात्वे वह्नेः साध्यत्वे अत्र चोभयोरपि धूमवद्वह्न्यवयवत्वयोः विरुद्ध-त्वादाह, पर्व्वतेति। संयोगस्य द्विष्ठत्वात् वह्नेः समवायेन संयो-गेन वा साध्यतायां व्यभिचारित्वमिति भावः सम्बन्धद्वयं संयोगः समवायश्च, तेन पर्व्वतस्य संयोगसम्बन्धावच्छिन्नाभावानधिकर-णत्वं वह्न्यवयवस्य च समवायसम्बन्धावच्छिन्नाभावानधिकरणत्वं च लभ्यते, तथाच तादृशाभावसमुदायवत्त्वं ह्रदादेरेव इत्यति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करणत्वेऽपि नातिव्याप्तिः, तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोऽपि बोध्यः। तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपक्षावृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धं, तत्र सद्धेतौ

व्याप्तिसम्भावनापीत्यपेरर्थः अत्र च साध्याभावमात्रविवक्षणे इदं गुणकर्म्मान्यसत्तावज्जातिमत्त्वादित्यत्रातिव्याप्तिः गुणवृत्तित्वविशिष्टसत्ताभावादीनामपि कूटमध्यपतितत्वात्। अथ तावदधिकरणे जात्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तित्वमप्रसिद्धमिति चेत् तथापि जातिमत्त्वप्रकारकप्रमाविषयत्वादिहेतुकेऽतिव्याप्तिः एवं वह्निमान् धूमादित्यादावव्याप्तिः, तत्र तत्तत् ह्रदावृत्तित्वावच्छिन्नाभावानामपि कूटमध्यनिविष्टत्वात्तावदधिकरणाप्रसिद्धेः। एवं साध्याभावस्य पूर्व्वोक्तविवक्षायामपि संयोगसम्बन्धावच्छिन्नप्रमेयसामान्याभावस्य कूटमध्यनिविष्टत्वात्तदधिकरणे रूपादौ हेतुतावच्छेदकसम्बन्धेन वृत्तित्वाप्रसिद्धिरित्यभिप्रेत्य साध्याभावपदमन्यथा व्याचष्टे, तथेत्यादि स्वं प्रतियोगिता तद्व्यापकीभूतं यत्साध्यतावच्छेदकं तद्व्यापिका या प्रतियोगितेत्यर्थः, स्वव्यापकीभूतेत्यस्य व्यावृत्तिमाह, यत्रेत्यादि। वह्निमान् धूमादित्यत्र ह्रदादिवृत्तित्वावच्छिन्नाभावस्य संयोगसम्बन्धावच्छिन्नप्रतियोगिताकस्यान्यत्रापि उत्पत्तिकालावच्छेदेन सत्वात् अभावसाध्यकपर्य्यन्तानुधावनं, ननु यावतामेकाधिकरण्यं सम्भवतीत्यादिवक्ष्यमाणविवक्षापत्ते इयं व्यावृत्तिर्न घटत इत्यत आह, पृथिवी-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादाववर्त्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरतिव्याप्तिर्वा, नाप्यभावत्वादिना अभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिरित्याहुः तन्न पृथिवीत्वद्रव्यत्वोभयवान् द्रव्य-

---

त्वादाविति। इयं पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादाविल्यर्थः, न चात्रापि तत्तज्जलावृत्तित्वावच्छिन्नाभावस्य तत्तज्जलादिमात्रवृत्तित्वात् कूटाधिकरणाप्रसिद्धिः तस्य समवायसम्बन्धावच्छिन्नाभावस्य सामान्यादावपि सत्वात् समवायसम्बेन द्रव्यत्वे हेतूकृते हेतुतावच्छेदकसम्बन्धेन तादृशवृत्तित्वमप्रसिद्धमतः प्रमाविषयत्वपर्य्यन्तानुधावनं, सामान्यादावपि विशेषणताविशेषेण कस्यचित् प्रमाविषयत्वस्य वृत्तेः साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकेत्यस्य व्यावृत्तिमाह, नापीति। अयमभाववान् प्रमेयत्वादित्यादौ घटत्वपटत्वाद्यभावाभावरूपस्य घटत्वपटत्वादेरेकाधिकरणाप्रसिद्धिरतोऽव्याप्तिरित्यर्थः, यद्यपि यावतामैकाधिकरण्यं सम्भवति तावतां कूटे विवक्षित एवाप्रसिद्धिप्रतीकारस्तथापि वक्ष्यमाणरीत्या अव्याप्तिर्बोध्या। तदुभयान्यतरेति। यत्रैव द्रव्यत्वाभावस्तत्रैव तदुभयान्यतराभावस्तथा च कूटमध्ये तस्यापि प्रवेशात् तमादायाधिकरणं गुणादेव। ननु स्वव्यापकसाध्यतावच्छेदकेत्यत्र स्वपर्य्याप्त्यधिकरणताकत्वं विव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादेरवृत्तेरतिव्याप्तेः, अपिच इदं पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत्द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे सत्वादतिव्याप्तेः द्रव्यत्वत्वावच्छिन्नप्रतियोगितायाः पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात् ॥ १३ ॥

किञ्च रूपाभावसाध्यके सद्धेतौ साध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धिः । यावता-

---

क्षणीयं तथाचान्यतरत्वावच्छिन्नाभावप्रतियोगितायाः प्रत्येकपरिसमाप्ताया अधिकरणे उभयत्वं न पर्य्याप्तमिति कूटमध्ये तदप्रवेश इत्यत आह, अपि चेति । अत्र च द्रव्यत्वनिष्ठाया अधिकरणे द्रव्यत्वे पृथिव्यन्यद्रव्यत्वत्वं पर्य्याप्तमिति ॥ १३ ॥

ननु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणे यावति यत्साध्यतावच्छेदकावच्छिन्नाधिकरणत्वं तदेव विवक्षणीयम्, तथाच तादृशप्रतियोगितावच्छेदकावच्छिन्नद्रव्यत्वाधिकरणे पृथिव्यां न पृथीव्यन्यद्रव्यत्वत्वावच्छिन्नाधिकरणत्वमित्यत आह, किञ्चेति रूपाभावेति । न च साध्यतावच्छेदकव्यापकीभूतप्रतियोगितेत्यस्य व्यावृत्तिरसंलग्नेति वाच्यम् अभाववान् अभिधेयादित्यत्र तथापि व्यधिकरणधर्म्मावच्छिन्नाभावसहिततादृशाभावरूपघटपटत्वाधिकरणे घटादौ वृत्तेरव्याप्तिः । ननु इदं पृथिवीवृत्तिगुणशून्यं वाच्यत्वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सभावानामैकाधिकरण्यं तावतां समुदाये विवक्षितेऽपि इदं पृथिवीवृत्तिगुणशून्यं सत्तान्यपृथिवीसमवेतशून्यं वा वायुत्वाद्रूपवदन्यत्वादित्यादौ चातिप्रसङ्गः।

तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन तद्वति हेतोरवृत्तेः। वस्तुतो लिखितानामेव रूपाणां तादृशाभावसहस्रसमानाधिकरणत्वात्

दिति सद्धेतुरेव उत्पत्तिकालावच्छेदेन महाप्रलयावच्छेदेन च वायुसामान्ये तादृशाभावसत्वादित्यत आह, सत्तान्येति। ननु पृथिवीसमवेताभावस्य समवेताभावसमनियततया समवेतमात्रस्यैव तत्प्रतियोगित्वेन समवेतस्य च वायावपि सत्वेनातिव्याप्तिर्न घटते इत्यत आह, सत्तेति, सत्तान्येति। वायुत्वस्य एतत्साध्यकविरुद्धतया आह, रूपवदन्यत्वेति। एतस्य हेतोः साध्यसामानाधिकरण्यं गुणादाविव रूपादीति अयं भावः। वायोः पृथिव्योः संयोगाधिकरणं द्वितयमेव यद्यपि, तथापि स्वसामानाधिकरण्यापन्नरूपघटितकूटस्याधिकरणं पृथिव्येवेति।

ननु यथा पृथिवीसमवेताभावसमवेताभावयोः समनैयत्यं तथा सत्तान्यपृथिवीसमवेताभावद्रव्यमात्रसमवेताभावयोरपीति वायुवृत्तिसमवेतकूटस्यापि साध्याभावात्मकतया तदादाय पृथिव्यादितद्वायुरपि कूटाधिकरणमिति स दोषस्तदवस्थ इत्यत आह, वस्तुत इति। तादृशाभावो व्यधिकरणधर्म्मावच्छिन्नाभावः, तथाच तादृशा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समानाधिकरण—यावदभावाधिकरणाप्रसिद्धिर्दुर्व्वारै-
वेति। किञ्च हेतुतावच्छेदकसम्बन्धेन या साध्या-
भाववति वृत्तिस्तदभावो वक्तव्यः अन्यथा धूमादाव-
व्याप्तिः। साध्यतावच्छेदकसम्बन्धेन साध्याभाववति
कालादौ वृत्तिवन्मात्रस्यैव वृत्तेर्व्यभिचारिण्यतिप्रसङ्गो
वा। तथाच सत्त्वादि-साध्यके संयोगेन समवायेन
हेतावव्याप्तिः। साध्याभाववति तेन सम्बन्धेन वृत्तेर-
प्रसिद्धेरिति।

भावसामानाधिकरण्यापन्नानि यावन्त्येव रूपाणि तावतामधि-
करणं सुतरामप्रसिद्धं रूपाभाववान् वायुत्वात्, इत्यत्रैवाव्याप्ति-
रिति भावः। ननु सामानाधिकरण्यापन्नानां यावतामैकाधि-
करण्यमिति न वाच्यं, किन्तु यस्मिन्नेवाधिकरणे यावन्तः सम्भवन्ति
तादृशमेवाधिकरणं ग्राह्यम् इत्यत आह, किञ्चेति। केचित्तु
स्वसाध्याभावत्वावच्छिन्नानां यावताम् ऐकाधिकरण्यम् अस्ति
च साध्याभावत्वावच्छिन्नस्य रूपस्य कूटमध्ये प्रवेश इति रूप-
सम्बलितकूटाधिकरणं घटादिरेव तत्राह, किञ्चेति अन्यथेति।
वह्निमान् धूमादित्यत्र साध्याभावकूटाधिकरणे धूमावयवे धूमस्य
वृत्तित्वादित्यर्थः। इदं पुनरिहावधेयं, यदि सम्बन्धत्वमेकं
नास्ति तदा साध्याभाववद्वृत्तित्वाभावाः संयुक्तत्वाभावाः सम-
वेतत्वाभावा इत्यमेव यावन्तोऽभावाः धूमे न सन्तीत्यव्याप्ति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साधनसमानाधिकरणत्वेन साध्याभावो विशेष-

णीया:, यदि च सम्बन्धत्वं पुनरेकं तदा तादृशवृत्तित्वाभावो व्यधिकरणधर्म्मावच्छिन्नाभाव एव वक्तव्य:, तथाच व्यभिचारिण्यतिप्रसङ्ग इति, तथाचेति। हेतुतावच्छेदकसम्बन्धेन वृत्तित्वविवक्षणे च इत्यर्थ:।

साधनसमानाधिकरणत्वेनेत्यादि। अत्र च विवक्षायां साध्यतावच्छेदकसमव्याप्तेत्यादिव्यावृत्तिप्रयास एवालग्नस्तथा हि पृथिवीत्वाभाववान् जलत्वादित्यत्र घटावृत्तित्वादिना योऽभाव: स साधनासमानाधिकरण एव। एवं पृथिवीत्ववान् द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादावपि जातित्वावच्छिन्नाभावस्तथा, तथाच साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकेत्येव वक्तव्यं साध्यतावच्छेदकव्यापकीभूतप्रतियोगिताकत्वाविवक्षणे उपदर्शिताभावादिसाध्यके प्रमेयादिसाध्यके च सद्धेतौ तत्तदभावत्वादिना अभावानां तत्तत्प्रमेयाभावानाञ्च साधनसमानाधिकरणानां समुदायापन्नानामधिकरणाप्रसिद्धे:, गुणकर्म्मान्यत्वविशिष्टसत्त्वावान् जातिमत्त्वात् इत्यत्र तु सत्ताभाव: साधनासमानाधिकरण एव इति न तस्य कूटमध्यप्रवेश:।

न च तथापि साधनसमानाधिकरण-गुणवृत्तित्वविशिष्टकर्म्मवृत्तित्वविशिष्टसत्तात्वावच्छिन्नाभावानामपि तथात्वात् जातिमत्त्वप्रकारकप्रमाविषयत्वादित्यादिहेतौ विशिष्टसत्तादिसाध्यकेऽतिव्याप्ति:, साध्यतावच्छेदकस्य प्रतियोगिताव्यापकत्वविवक्षणे-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

णीय इति चेद्विशिष्यन्तां तथापि भूतत्वमूर्त्तत्वाद्योरण्यतरत्वेनान्यरताभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिस्तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः ॥ १४ ॥

किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशिषेणहेतावतिव्याप्तिः । तादृश-

---

ऽपि तद्दोषतादवस्थ्यात् एतत्सर्व्वं परिचिन्त्यैवेतेनेत्यादि वक्ष्यति । एवं पृथिवीत्वद्रव्यत्वोभयवानित्यत्रापि साधनसामानाधिकरण्यविशेषणेनैव वारणं बोध्यम् ।

तथापीति । भूतत्वमूर्त्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादावित्यर्थः । तत्रापि भूतत्वमूर्त्तत्व एव अन्यतराभावाभावास्ते तु प्रत्येकं गगनादौ साधनसमानाधिकरणा एव तादृशकूटाधिकरणं वायुपर्य्यन्तमेव तद्वृत्तित्वाभावः स्पर्शवदन्यत्वे स्फुट एवेति ॥ १४ ॥

ननु कूटतापन्नस्य साधनसमानाधिकरण्यं विवक्षितं, तथाच भूतत्वमूर्त्तत्वं कूटावच्छिन्नं सत् न साधनसामानाधिकरणमिति । नातिव्याप्तिरित्यत आह, किञ्चेति । अयं महाकालान्यो घटादित्यत्र साध्याभावकूटाधिकरणं महाकाल एव कालिकसम्बन्धेन महाकालवृत्तित्वाभावः कालिकसम्बन्धेन वृत्तिमति वर्त्तते यः स व्यधिकरणधर्म्मावच्छिन्नाभाव एव इत्यतिव्याप्तिरित्यर्थः, एव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्याभावसमुदायवति महाकाले तेनैव सम्बन्धेनवृत्तिमन्मात्रस्यैव वृत्तेः। एतेन साध्यतावच्छेदकावच्छिन्न-

---

मेतद्रूपाभिन्नं गुणत्वात् ज्ञानादित्यादौ तादृशसाध्याभावसमुदायाधिकरणे एतद्रूपभिन्ने समवेतत्वाभावः एतद्रूपभिन्ने विषयित्वाभावो वा तादृशसम्बन्धेन वृत्तिमन्मात्रवृत्तिर्यः स व्यधिकरणधर्मावच्छिन्नाभाव एवेत्यतिव्याप्तिः। एवं एतत् पटाभिन्नं घटादित्यत्र संयोगेन हेतुतायामपि बोध्यम्।

अत्र केचित् सार्व्वभौममते सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमितिन्यायेन वृत्तित्वाभावः प्रायशोऽव्याप्यवृत्तिरेव, तथाच प्रकृतेऽपि कालिकसम्बन्धेन हेतौ घटे कालोपाध्यवच्छेदेन महाकालवृत्तित्वाभावे समानाधिकरणधर्मावच्छिन्नप्रतियोगिताके विद्यमानेऽपि हेत्वधिकरणावच्छेदेन तस्यावृत्तित्वान्नातिव्याप्तिः, लक्षणे तथैव विवक्षणादित्याहुः।

परे तु साध्याभावकूटाधिकरणवृत्तित्वाभावा इत्यत्र तु वृत्तित्वं दैशिकविशेषणताविशेषेणैव, तथाच तादृशवृत्तित्वाभावायावन्तो येषु दैशिकविशेषणताविशेषकालिकेषु तानि यद्रूपावच्छिन्नस्य व्यापकानि तत्त्वमित्यर्थः। तथाहि महाकालान्यो घटादिस्तत्र महाकालान्यत्वप्रकारकप्रमाविषयत्वं तथा, न च कालिकसम्बन्धेन घटव्यापकं इत्यपि वदन्ति।

ननु साध्यतावच्छेदकसमव्याप्तप्रतियोगिताकत्वं साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वं वा विवक्षताम् उभयथापि इदं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकव्याप्यवृत्ति-स्वसमानाधिकरण--यावदभावाधिकरण--वृत्तित्वाभावा यावन्तो वृत्तिमद्वृत्तयस्तद्वत्त्वं व्याप्तिः केवलान्वयिनः संयोगाद्यभावस्याभावाः संयोगादयो न व्याप्यवृत्तयः ।

एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेन वर्त्तमानोऽपि न व्याप्य-

---

पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वात् इत्यत्रातिव्याप्तिः। तत्र तद्द्रव्यवृत्तित्वविशिष्टद्रव्यत्वाभावानां साधनसमानाधिकरणानां प्रतियोगिताव्यापकसाध्यतावच्छेदकव्यापकत्वस्य समव्याप्तत्वस्यापि सत्त्वात्तादृशकूटाधिकरणद्रव्यवृत्तित्वाभावस्य च द्रव्यत्वे सत्त्वादतिव्याप्तिरित्यत आह, [illegible] तथाच साधनसमानाधिकरणेत्यादिविवक्षणे साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकेत्येव विवक्षणीयम्, एतेनेत्यस्य तु पूर्व्वोक्तातिव्याप्तिद्वयेनेत्यर्थः।

केवलान्वयिन इत्यादि इदं कपिसंयोगाभाववत् मेयत्वादित्यादौ साधनसमानाधिकरणसंयोगात्मकाभावमादाय कूटाधिकरणं द्रव्यमेव तद्वृत्तित्वाभावो मेयत्वे वाधित इत्यव्याप्तेर्व्याप्यवृत्तिपदेन वारणमिति दैशिकाव्याप्यवृत्तिवारणमुक्त्वा कालिकाव्याप्यवृत्तिवारणमाह, एवमिति। गुणवान् द्रव्यत्वात् इत्यादावित्यर्थः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृत्तिः उक्तरूपानवच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिद्ध्यादिसम्पादकाः पुनरभावा न हेतुसमानाधिकरणाः । उक्तसमुदायाधिकरणावृत्तित्व-तदभाववृत्तिमत्त्वानि पूर्व्वोक्तरीत्या प्रत्येतव्यानि इत्यादिकमपास्तम् ॥ १५ ॥

अत्र च साधनसमानाधिकरणगुणसामान्याभावमादाय कूटाधिकरणं नित्यद्रव्यभिन्नमेव तद्वृत्तित्वाभावस्य द्रव्यत्वे बाधित इत्यव्याप्तिः सम्भवितुमर्हति इत्यर्थः, उक्तरूपेति । साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नेत्यर्थः, क्वचिदिति । पृथिवीत्वाभाववान् जलत्वादित्यादावित्यर्थः, अप्रसिद्धीति । पृथिवीत्वाभाववान् जलत्वादित्यत्र घटावृत्तित्वादिना ये तादृशाभावास्तेषां कूटाधिकरणाप्रसिद्धिरित्यर्थः, आदिपदादिदं जलं द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादावतिव्याप्तिपरिग्रहः, पूर्व्वोक्तेति । हेतुतावच्छेदकसम्बन्धेन वृत्तित्वं तदभावस्य वृत्तितात्वसमनियतप्रतियोगिताकः, वृत्तिमत्त्वमपि हेतुतावच्छेदकसम्बन्धेन प्रतियोगिताव्यापकतादृशवृत्तितात्वेत्यादिव्यावृत्तिस्तु, उपदर्शितालोकावृत्तित्वेनाभावमादाय न घटते वह्निसामान्याभावस्य साधनासमानाधिकरणत्वात्, जगद्वृत्तित्वस्य चालोकावृत्तित्वादिति । किन्तु जगद्वृत्तित्वधूमत्वोभयाभावमादाय बोध्या, तदभावस्य तादृशवृत्तितात्वव्यापकप्रतियोगिताकत्वात्, अन्यच्च पूर्व्ववद्बोध्यम् ॥ १५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्त्वचिन्तामणिः ।

प्रतियोग्यवृत्तिश्च धर्म्मो न प्रतियोगितावच्छेदकः तद्विशिष्टज्ञानस्याभावधीहेतुत्वात् ।

अन्यथा निर्व्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः । गविशशशृङ्गं नास्ति इति प्रतीतेरसिद्धेः शशशृङ्गं नास्तीति च शशे शृङ्गाभाव इत्यर्थः ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ व्यधिकरणधर्म्मावच्छिन्नाभावः समाप्तः ।

दीधितिः ।

तद्विशिष्टेति । विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वात् अभावप्रतीतिर्हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादेस्तदवच्छेदकत्वमवगाहते ।

प्रतियोगितावच्छेदकविशिष्टज्ञानं हि नाभावधीमात्रहेतु-रिति व्याचष्टे, विशेषणतेति । अतएव वक्ष्यति अभावप्रत्ययो विशिष्टवैशिष्टमर्य्यादां नातिशेत इति विशेषणस्यापि इ- पुनः प्रत्यक्षप्रतीतिमभिप्रेत्य, शब्दादौ तु तदवच्छेदकत्वं रन्यथोपपादितमेव न स्वातन्त्र्येणेति, अतएव वक्ष्यमाणविकल्पाः सङ्गच्छन्त इति भावः ।

[illegible]